केरलपाठावलिः

# संस्कृतम्

सप्तमी कक्ष्या

अक्कादमिक-संस्कृतविद्यालयानां कृते

## अध्यापकमित्रम्

KERALA READER

# SANSKRIT

STANDARD VII

FOR ACADEMIC AND SANSKRIT SCHOOLS

## TEACHER TEXT

Draft

Government of Kerala

Department of General Education

Prepared by

State Council of Educational Research and Training (SCERT) Kerala

2024

# विषयानुक्रमणिका


| एककम् | | पाठस्य नाम | व्यवहाररूपम् | पुटसंख्या |
|---|---|---|---|---|
| | केरलपाठ्यपद्धतिरूपरेखा २०२३ - संक्षिप्तम् | | | 7 – 32 |
| १ | मानविकता | १ विश्वं जयाम | बालकविता | 33 – 40 |
| | | २ सफला कर्मधीरता | सम्भाषणम् | 41 – 48 |
| | | ३ भ्रातृस्नेहः | काव्यांशः | 49 – 55 |
| २ | नैतिकता | ४ नीतिबोधो महत्तमः | चित्रकथा | 56 – 63 |
| | | ५ सूक्तिरत्नानि | सुभाषितानि | 64 – 71 |
| | | ६ सः स्वप्नोऽपि पुष्पितः | नाटकम् | 72 – 80 |
| ३ | शास्त्रीयता | ७ अनन्तं विश्वमज्ञातम् | यात्राविवरणम् | 81 – 86 |
| | | ८ परीक्षणानां सम्राट् | कथा | 87 - 94 |
| ४ | सहृदयता | ९ वाक्यकोविदः | जीवनचरितम् | 95 – 102 |
| | | १० दीनदयालुता | चम्पूः | 103 - 108 |


Draft

## वार्षिकासूत्रणम्

| | मासः | पाठः | कालांशः | प्रवर्तनानि |
|---|---|---|---|---|
| 1 | जूण् | विश्वं जयाम | 14 | कवितालपनम्, टिप्पणीलेखनम्, कवितापरिवर्तनम्, कवितानां समाहरणम्, वाक्यपरिवर्तनम्, वाक्यनिर्माणम्। |
| 2 | जूलै | सफला कर्मधीरता | 14 | भाववाचनम्, वार्तावतारणम्, पादटिप्पणीलेखनम्, लङ्लकारलेखनम्। |
| 3 | जूलै आगस्त् | भ्रातृस्नेहः | 14 | श्लोकालपनम्, अन्वयलेखनम्, लघुटिप्पणीलेखनम्, प्रश्नोत्तरलेखनम्, वाक्यरचना। |
| 4 | आगस्त् सेप्तम्बर् | नीतिबोधो महत्तमः | 12 | साभिनयावतरणम्, सम्भाषणपूरणम्, कथासम्पुटरचना, पदच्छेदलेखनम्, वाक्यरचना, पट्टिकाकरणम्। |
| 5 | ओक्टोबर् | सूक्तिरत्नानि | 12 | सुभाषितालपनम्, स्फोरकपत्ररचना, टङ्कणकार्यम्, सुभाषितसम्पुटनिर्माणम्, प्रश्नानाम् उत्तरलेखनम्, विना इति अव्ययम् उपयुज्य वाक्यरचना। |
| 6 | ओक्टोबर् नवम्बर् | सः स्वप्नोऽपि पुष्पितः | 16 | टिप्पणीलेखनम्, नाटकस्य रङ्गाविष्कारः, इष्टकथापात्राणां वैशिष्ट्यलेखनम्, जीवनचरितलेखनम्, संस्कृतकवीनां तेषां नाटकानां च नामानां योजनम्। |
| 7 | डिसम्बर् | अनन्तं विश्वमज्ञातम् | 10 | यात्राविवरणलेखनम्, चित्रं दृष्ट्वा वाक्यलेखनम्, प्रश्नवाचकनिर्माणम्। |
| 8 | जनुवरि | परीक्षणानां सम्राट् | 12 | सस्वरवाचनम्, पत्रलेखनम्, यथोचितयोजनम्, अव्ययान्युपयुज्य वाक्यलेखनम्, सम्पुटनिर्माणम्। |
| 9 | जनुवरि फेब्रुवरि | वाक्य-कोविदः | 14 | पाठभागस्य अवतारणम्, जीवनचरितस्य रूपरेखानिर्माणम्, टिप्पणीलेखनम्, वर्षाणाम् अक्षरैः लेखनम्, वाक्यपरिवर्तनम्, कथापरिवर्तनम्। |
| 10 | फेब्रुवरि मार्च् | दीनदयालुता | 14 | पाठभागस्य अवतारणम्, कथापूरणम्, वाक्यरचना, वाक्यटङ्कणम्, विभक्ति उपयुज्य वाक्यरचना। |
| 11 | मार्च् | | | पुनरावृत्तिः |

Draft

# एककम् - १

# मानविकता।

Draft

मानविकतेति नामकेऽस्मिन्नेकके त्रय: पाठा: समाकलिता:। ते च सहजीविन: सर्वेऽपि सहोदरा: अस्मत्समाना: इति भावनां द्योतयन्ती 'विश्वं जयाम' इति कविता, अपघातगतान् जनान् जीवनतीरं प्रापयितुं यतमानानां परिश्रमवृत्तं प्रतिपादयन् 'सफला कर्मधीरता' इति एक: पाठ:, इतिहासकाव्यात् रामायणात् भ्रातृस्नेहं बोधयन् सम्पातिजटायुषोः वृत्तान्तप्रतिपादक: 'भ्रातृस्नेहः' इति एक: पाठ: च। पाठत्रयस्याध्ययनेन मानविकताया: महिमानमवगन्तुं शक्यते।

# पाठः - १

# विश्वं जयाम।

| | |
|---|---|
| आशय: | मानविकता। |
| उपाशय: | मैत्री। |
| व्यवहाररूपम् | कविता। |
| उद्देश्यानि /लक्ष्याणि | सर्वे मानवाः परस्परसहयोगेन सौहृदेन सर्वथा सर्वदा च जीवनं कुर्वन्ति। तद्वारा विश्वमानवसङ्कल्पस्य मूल्यानि छात्राः अवगच्छन्ति। |
| मूल्यम् / मनोभाव: | सर्वे सहजा: इति भावना जायते। जीवने मैत्री अनिवार्येति चिन्तनम्। |
| पठनलक्ष्याणि | सतालम् आलपति।<br>आशयं गृह्णाति।<br>कवितां परिवर्तयति।<br>सम्पुटं रचयति।<br>वाक्यं परिवर्तयति। |
| पठनक्षमता | आलपनसामर्थ्यं वर्धते।<br>रचनासामर्थ्यं जायते। |
| कालांश: | १४ |

**पाठस्य आमुखम्।**

प्रत्येकमपि मानव: विविधै: गुणै: सहैव जनिं लभते। स: सामूहिकवातावरणेन काञ्चित् गुणान् आर्जयति यै: स्वयं मानविकतां धरति। दया, क्षमा, स्नेह:, धीरता, नीतिबोध:, मैत्री इत्यादिगुणै: मानव: वसुधामिमां कुटुम्बत्वेन पोषयति। अथवा एतै: सद्गुणै: सहजीविषु अपि सहोदरभावं द्रष्टुं शक्यते।

**प्रवेशकप्रवर्तनम्।**

पाठपुस्तके चत्वारि पदानि दत्तानि सन्ति। तेषु के के गुणाः के के अवगुणाः इति परिदृश्य

Draft

उचितानुसारं चिह्नेन अङ्कयन्तु इति निर्दिशति। तदनु तेषां गुणानां प्राधान्यमधिकृत्य ईषत् प्रतिपाद्य पाठभागं प्रविशति।

**पाठापग्रथनम् ।**

शान्तिः, नीतिबोधः, सत्यम्, धर्मः, समत्वम् इत्यादिगुणयुक्ताः भूत्वा वयं सर्वे विश्वसोदरभावनया अखिलं विश्वं जेतुं परिश्रमं कुर्मः। अस्माकं जीवनं शत्रुभावनां परित्यज्य मित्रभावनया भवतु। हीनविचारान् अज्ञानतमः च निवार्य ज्ञानमार्जयित्वा पुरतो गच्छामः इति मित्रकान् संस्मारयन् पाठभागः एव अत्र प्रदत्तः।

सहजीविषु स्नेहमनोभावम् उत्पादयितुं समर्थः अयं पाठभागः। अस्य बोधनेन छात्रेषु समाजे विद्यमानान् इतरजीविवर्गान् प्रति सोदरभावः उत्पद्यते। मानवेषु सामूहिकसेवातत्परतां जनयितुम् उपकारकः चायं पाठभागः। अस्य सामूहिकशास्त्रेण सह सम्बन्धः अस्ति एव। यानि यानि आत्मसुखाय आचर्यन्ते तानि अपरस्य दुःखकारणानि मा भवेयुः इति विचारः च अनेन जायते। समाजे न केवलं मानवाः, न केवलं समर्थाः, न केवलं धनिकाः अपि तु इतरे च सन्तीति भावनया सहैव प्रत्येकं छात्रः वर्धताम्।

**चित्रविशदीकरणम्**

चित्रे बालिकाबालाः स्नेहेन सौहार्देन च व्यवहरन्ति। सर्वे छात्राः समभावनया भेदभावं विना नन्दन्ति।

**पठनप्रवर्तनानि।**

**प्रवर्तनम् १ - कवितालपनम्**

पठनलक्ष्यम् - सतालम् आलपति।

कवितां सङ्घशः व्यक्तिशश्च सतालम् आलपति। (कवितायाः सस्वरालपनम् ऐ.सि.टि.द्वारा श्रावयति।) (सस्वरालपनाय कस्यचित् सङ्गीतज्ञस्य साह्यं स्वीकर्तुं शक्यते।) (उत्तमालपनद्वारा सङ्गीते समर्थः भवितुं अनेन शक्यते।)

**मूल्यनिर्णयसूचकानि।**

उचितताल:। अक्षरस्फुटता। आलपनशैली। उचितः भावः।

**प्रवर्तनम् २ - टिप्पणीलेखनम्।**

पठनलक्ष्यम् - आशयं गृह्णाति।

Draft

पाठपुस्तके दत्तान् प्रश्नान् परिशीलयति। चर्चां चालयति। चर्चायाम् उद्भूतान् अंशान् क्रोडीकृत्य टिप्पणीं लिखति। (एवं विविधसन्दर्भेषु चर्चया आशयान् क्रोडीकर्तुं तत्प्रयोक्तुं च छात्रः समर्थः भवेत्।)

(समकालिकसामूहिकपरिस्थितिः अतीव कलुषिता भवति। दया, स्नेहः, सहिष्णुता, त्यागः, सहवर्तित्वम्, धर्मः, सत्यनिष्ठा, वाक्पालनम् इत्यादीनां गुणानां मूल्यशोषणं दरीदृश्यते। सहजीविस्नेहः, समभावना, तुल्यता, उपकारिता, पारस्पर्यम् इत्यादिभावैः विना जीवनं निरर्थकं भवति। अद्यतनबालकाः श्वस्तनसमूहशिल्पिनः भविष्यन्ति। तदर्थं बालकानां मनस्सु पूर्वोक्तानां गुणानां समावेशनम् अत्यन्तमपेक्षितमेव। अस्मद्भिन्नं किमपि मम हृदि आर्द्रतां न जनयिष्यतीति विचारः कदापि न भवेत्। अपरस्यापि दुःखं मदीयमिति धिया तस्य दुःखेऽपि भागभाक् भवितुं तं तस्मात् उद्धर्तुं च योग्यः भवेत् प्रत्येकं छात्रः।)

**मातृका -**

अखिलं विश्वं जेतुं विश्वसोदरभावनां हृदये कलयामः। जीवने शान्तिः, नीतिबोधः, सत्यम्, धर्मः, समत्वम्, मित्रभावना, संहतिभावना इत्यादिगुणाः अपेक्षिताः। हीनचिन्तां वर्जयित्वा विज्ञानमार्जयन्तः सततं पुरतो गच्छामः।

**मूल्यनिर्णयसूचकानि।**

उचितभाषाप्रयोगः। उचिता वाक्यघटना। आशयव्यक्तता।

**प्रवर्तनम् ३ - कवितापरिवर्तनम्।**

पठनलक्ष्यम् - कवितां परिवर्तयति।

कोष्ठके प्रदत्तानि पदानि उपयुज्य कवितांशस्य रेखाङ्कितपदानि परिवर्त्य नूतनां कवितां रचयति। यथा-

<u>कीर्ति</u>रस्तु सदास्तु सुहृदो<br>
<u>स्नेहबन्धो</u> जीवने।<br>
सत्य-धर्म-समत्वसहिताः<br>
सन्तु सहजाः <u>सर्वथा</u>।।

अन्यः श्लोकः।

<u>पूर्ति</u>रस्तु सदास्तु सुहृदो<br>
<u>मूल्यबोधो</u> जीवने।



Draft

सत्य-धर्म-समत्वसहिताः

सन्तु सहजाः निर्भयाः।।

(विशेषज्ञस्य साहाय्येन कवितारचनाशिल्पशालां प्रचाल्य संस्कृतोत्सवादिस्पर्धासु भागग्रहणाय छात्रान् समर्थान् कर्तुं शक्यते।) (तद्वारा स्वयंसन्नद्धस्य कृते स्वतन्त्ररूपेण अन्यां कवितां रचयितुं शक्यते।)

(सर्गात्मकरचनामण्डले सामर्थ्यं चावाप्यते।) (तथा च अग्रिमचरणस्यापि पदपरिवर्तनं सुकरं भवेत्। अत्र कतिपयपदानि परिवर्त्य नूतनकवितायाः रचनायै छात्रान् प्रेरयति।)

विश्वमखिलं जेतुमचिरात्

मित्रकाणि यतामहै।

विश्वसोदरभावनां हृदि

शाश्वतं कलयाम रे।।

यथा - स्नेहमखिलं प्राप्तुमचिरात्

.........................................

**मूल्यनिर्णयसूचकानि।**

उचितः पदप्रयोगः। उचितः तालबोधः। उचितः आशयः।

**प्रवर्तनम् ४ - समानाशययुक्तानां कवितानां समाहरणम्।**

पठनलक्ष्यम् - सम्पुटं रचयति।

मैत्री, क्षमा, नीतिबोधः, दया इत्याद्याशययुक्ताः संस्कृतकविताः सञ्चित्य कक्षायाम् अवतारयति। ताः विलिख्य सम्पुटं रचयति, प्रकाशयति च। समानाशययुक्तकविताः इतरभाषाभ्यः सञ्चित्य लिखति। यथा - സ്നേഹമാണഖിലസാരമൂഴിയിൽ इत्यादि। (पठनानुभवविपुलीकरणाय अम्बा इति बालकवितापुस्तकम् (संस्कृतमाधुरी) अपि कक्ष्यायां परिचाययतु। एवं च ताः कविताः यथायोग्यं सङ्गीतनृत्तशिल्पत्वेन अवतारयितुं प्रेरयति। दूरवाण्या उत ध्वन्यङ्कनयन्त्रद्वारा तं कवितांशम् अङ्कयित्वा अवतारयितुं च निर्दिशतु।)

**मूल्यनिर्णयसूचकानि।**

उचितः आशयः। उचिता सम्पुटघटना। उचितम् अवतारणम्।



Draft

**प्रवर्तनम् ५ - वाक्यपरिवर्तनम्।**

पठनलक्ष्यम् - वाक्यं परिवर्तयति।

पाठ्यपुस्तके दत्तानि लट् लकारयुक्तानि वाक्यानि उदाहरणानुसारं सम्बोधनेन सह लोट् लकारे परिवर्त्य लिखति। यथा -

| | |
|---|---|
| सुरेशः श्लोकं पठति। | हे सुरेश! श्लोकं पठतु। |
| अरविन्दः वृक्षं सिञ्चति। | हे अरविन्द! वृक्षं सिञ्चतु। |
| जोसफः चलनचित्रं पश्यति। | हे जोसफ! चलनचित्रं पश्यतु। |
| दिलीपः चित्रं रचयति। | हे दिलीप! चित्रं रचयतु। |
| आकाशः आम्रं खादति। | हे आकाश! आम्रं खादतु। |
| लता पाठं लिखति। | हे लते! पाठं लिखतु। |
| रसिया गीतं गायति। | हे रसिये! गीतं गायतु। |
| तारा जलं पिबति। | हे तारे! जलं पिबतु। |
| भावना नृत्तं करोति। | हे भावने! नृत्तं करोतु। |
| नीलिमा विद्यालयं गच्छति। | हे नीलिमे! विद्यालयं गच्छतु। |

अनेन प्रवर्तनेन सम्बोधनरूपं तथा लोट्लकाररूपं च विज्ञाय छात्राः लघुसम्भाषणं कक्ष्यायाम् अध्यापकस्य साहाय्येन अवतारयन्तु। (तद्वारा तेभ्यः स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्णयाय च अवसरः लभ्यते।)

**मूल्यनिर्णयसूचकानि।**

उचिता वाक्यरचना। उचितः लिङ्गप्रयोगः। उचितः सम्बुद्धिप्रयोगः। उचितः लकारप्रयोगः।

**प्रवर्तनम् ६ - वाक्यनिर्माणम्।**

पठनलक्ष्यम् - वाक्यं परिवर्तयति।

प्रत्येकं मञ्जूषायां गुणाः अवगुणाः च प्रदत्ताः सन्ति। तानि पदानि पठित्वा स्वजीवने कं गुणम् आर्जयति, कम् अवगुणं त्यजति इति उदाहरणानुसारं लिखति।

गुणाः - क्षमा, उत्साहः, धीरता, धर्मः, सत्यसन्धता, सहिष्णुता।

अवगुणाः - परदूषणम्, भयम्, कोपः, अधर्मः, असहिष्णुता, आलस्यम्।

Draft

यथा- अहं कोपं त्यजामि, स्नेहम् आर्जयामि।
अहं परदूषणं त्यजामि, क्षमाम् आर्जयामि।
अहं भयं त्यजामि, उत्साहम् आर्जयामि।
अहम् अधर्मं त्यजामि, सत्यसन्धताम् आर्जयामि।
अहम् असहिष्णुतां त्यजामि, सहिष्णुताम् आर्जयामि।
अहम् आलस्यं त्यजामि, धीरताम् आर्जयामि।

**मूल्यनिर्णयसूचकानि।**

उचिता वाक्यरचना। उचितः विभक्तिप्रयोगः। उचितः आशयावबोधः।

**अग्रिमपाठसंयोजकं प्रवर्तनम्।**

परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥
(भगवद्गीता 3/11)

मानवाः परस्परं भावयन्तः परं श्रेयांसं प्राप्नुवन्ति।

**अनुबन्धः।**

चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम्।
प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति॥ (विदुरनीतिः)

मानवाः परस्पराश्रयेणैव समाजे जीवन्ति। यः स्वकीयप्रवृत्त्या इतरान् नन्दयति सः एव इतरैः तुष्यते। अपराणां साहाय्यं विना जीवितुं यः यतते सः वस्तुतः स्वार्थपरः भवति। तादृशानां कृते आपदि साह्यं प्रदातुं न कोऽपि भवेत्।

पदार्थाः -

| | | |
|---|---|---|
| यतते | - | പ്രയത്നിക്കുന്നു. |
| हृदि | - | ഹൃദയത്തിൽ |
| कलयति | - | കണക്കാക്കുന്നു |
| वर्जयन्तः | - | ഉപേക്ഷിക്കുന്നവർ |
| उपास्महे | - | നമ്മൾ സേവിക്കുന്നു |

Draft

वारयन्तः - തടയുന്നവർ

यामः - നമ്മൾ പോകുന്നു.

अग्रतः - മുന്നോട്ട്

यतामहै - നമുക്ക് പ്രയത്നിക്കാം

ज्ञानभानुः - അറിവാകുന്ന സൂര്യൻ

कलयामः - നമ്മൾ കണക്കാക്കുന്നു.

क्रियापदानि

जयाम – जि -जये अभिभवे -पर.लोट्.उ.पु.ब.व.

| ए.व | द्वि.व | ब.व. |
|---|---|---|
| जयतु /जयतात् | जयताम् | जयन्तु |
| जय /जयतात् | जयतम् | जयत |
| जयानि | जयाव | जयाम |

यतामहै - यती प्रयत्ने आत्म.लोट्.उ.पु.ब.व.।

उपास्महे - उप +आस उपवेशने आत्म.लट्.उ.पु.ब.व.।

नामपदानि

सुहृदः - दकारान्तः पुँलिङ्गः प्र.ब.व.।

वारयन्तः - नकारान्तः, शतृप्रत्ययान्तः पुँलिङ्गः प्र.ब.व.।

पर्यायपदानि

सहजः - समानोदरः, सोदरः, सगर्भ्यः, सहोदरः, समः।

हृत् - चित्तम्, चेतः, हृदयम्, स्वान्तम्, मानसम्, मनः।

Draft

## पाठः - २

# सफला कर्मधीरता।

| | |
|---|---|
| आशयः | मानविकता। |
| उपाशयः | सहकरणम्/सहवर्त्तित्वम् |
| व्यवहाररूपम् | सम्भाषणम् |
| उद्देश्यानि/लक्ष्याणि | प्रतिसन्धितरणसमर्थाः, आपत्सु रक्षाप्रवर्तनोन्मुखाः च भवन्ति छात्राः। परस्परसहयोगिनश्च सन्ति छात्राः। |
| मूल्यम् / मनोभावः | आत्मधैर्यम्। आपदि रक्षाप्रवर्तनसन्नद्धता। सहयोगमनोभावः। |
| पठनलक्ष्याणि | आशयमवगच्छति।<br>भाषाप्रयोगसामर्थ्यं सम्पादयति।<br>वार्तामवतारयति।<br>पादटिप्पणीं लिखति।<br>लङ्लकारज्ञानं सम्पादयति। |
| पठनक्षमता | सम्भाषणकौशलं वर्धते। |
| कालांशः | १४ |

Draft

### पाठस्य आमुखम्।

दक्षिण-अमेरिकायाः बृहत्तमं उष्णमेखलावर्षवनं भवति आमसोण्। इदम् आमसोणिया इत्यपि अभिधीयते। भूमौ अवशिष्यमाणानां वर्षवनानां अर्धादूर्ध्वं आमसोण् प्रतिनिधीकरोति। लोकस्य अत्यधिकं जैववैविध्यं अत्र विद्यते। अद्य विद्यमानानां सस्यानां जन्तुजालानां च महान् शेखरः आमसोण् वर्षारण्ये दृश्यते। वनेऽस्मिन् प्रायः १६,००० विभागेषु ३९० बिल्यण् वृक्षाः वर्तन्ते। भीतिदायकाः नैके जीविवर्गाः तत्र जीवन्ति। ३० दशलक्षं जनाः अपि तत्र निवसन्ति।

२०२३ मेई १ दिनाङ्के पितुः सकाशं गन्तुं १३,९,५,१ वयोपेताः सोदराः मात्रा सह लघुविमानेन सान्जोस् नगरं प्रति प्रस्थिताः। आमसोण् वर्षवनस्य उपरि विमानं विभग्नमभवत्। माता मग्दलना तथा विमानचालकौ च मृत्युं प्राप्तवन्तः। आमसोण् वर्षारण्ये

निपतिताः चत्वारः केवलं प्राणैः रक्षां प्राप्ताः। एतेषां पुनःप्राप्तये सैन्यम् एकमासं यावत् विविधसंघैः तद्देशीयानां साहाय्येन अन्वेषणम् अकरोत्। अन्ततो ४० दिनेभ्यः पश्चादेव बालानां प्राप्तिः अजायत। त्रयोदशवर्षीया लस्ली एव इतरेभ्यः धैर्यं प्रदाय अतिजीवनाय प्रचोदनमदात्। लस्ली चत्वारिंशत् दिनानि यावत् फलमूलानि सञ्चित्य सोदरेभ्यः भोज्यत्वेन दत्तवती। सा एकवर्षीयम् शिशुं वक्षसि निधाय दिनानि निनाय। अपघातात् चतुर्थे दिने तेषां सम्मुखे एव माता प्राणान् अत्यजदिति पश्चात् पिता मानुवल् मिल्लर् रानोख् माध्यमेभ्यः अकथयत्।

अपघातवृत्तान्तममुं नियमितश्वासेन एव लोकः अशृणोत्। आबालवृद्धं जनानां लोचनानि अपि आर्द्रितानि अभवन्। क्रिस्टिन्, टिन्, सोलनि, लस्ली च प्रत्येकं गृहेषु चर्चाविषयः अभवत्। एतेषां प्राप्तये प्रवृत्तस्य परिश्रमस्य वार्तां श्रुत्वा कस्मिंश्चित् गृहे प्रवृत्तं सम्भाषणं किमिति पश्यामः।

## प्रवेशकप्रवर्तनम्।

पाठप्रवेशकप्रवर्तने एकं रेल्यानदुरन्तस्य चित्रं दत्तमस्ति। दुरन्तसमये अपघातगतान् रक्षाप्रवर्तकान् च तत्र द्रष्टुं शक्यते। चित्रं दृष्ट्वा सूचनानुसारं चर्चां प्रचालयति। दुरन्तप्रदेशे किं किं प्रवृत्तमिति संघशः विचार्य अवतारयन्ति।

## पाठापग्रथनम्।

आमसोण् वर्षारण्ये विमानदुरन्ते निपतितानां लस्लीप्रभृतीनां चतुर्णां वार्तां दृश्यमाध्यमद्वारा जनाः जानन्ति। पञ्चप्रयुतकिलोमीटर् विस्तृतौ वर्तमाने महारण्ये मातृविप्रयुक्ताः चत्वारः शिशवः अनाथाः अभवन्। वृत्तान्तमिदं पश्यन्ती काचित् बालिका अपघातमधिकृत्य गृहस्थान् मातृपितृजनान् पृच्छति। माता पिता मातामही च तस्याः संदेहनिवारणं कुर्वन्ति।

मात्रा साकं यात्रां कृतवन्तः सोदराः आमसोण् वर्षवने निपतिताः। ते वैमानिकयोः मातुः च मरणस्य साक्षीभूताः अभवन् । निरालम्बानां तेषां रक्षणाय सैनिकाः बहुप्रयत्नं कृतवन्तः। किन्तु वृष्टिपातेन सर्वः श्रमः विफलः जातः। नाविकसेनायाः अन्वेषणे च जीवन्तः सन्तीति विज्ञातम्। तद्देशीयानां नाविकानां सैनिकानां तथा च बेल्जियं षपेर्ड् शुनकस्य च सहयोगेन चत्वारिंशे दिने ते बालाः रक्षिताः अभवन्। सहजीविस्नेहस्य सहयोगस्य अतिजीवनस्य च दृष्टान्तत्वेन इयं घटना प्रशस्ता अभवत्।

## चित्राणां विशदीकरणम्।

पाठभागे दृश्यमाध्यमे वार्तावतारणस्य चित्रमस्ति। तत्र आमसोण् वनान्ते प्रवृत्तस्य दुरन्तस्य वृत्तान्तं ज्ञापयन्ती वार्ताग्राहिका वर्तते। दूरदर्शनस्य अधोभागे वार्ताशकलानि

Draft

तथा मध्यभागे प्रमुखाः वार्ताः च प्रकाशयति।

पाठस्य द्वितीये चित्रे जनाः सकुटुम्बं दूरदर्शनं पश्यन्ति। तत्र माता, पुत्री, मातामहः, मातामही, पिता, पुत्रः च सन्ति। ते आमसोण् दुरन्तस्य वार्तां निर्वण्य चकिताः उपविशन्ति। पुत्री इतरान् प्रति दुरन्तवृत्तान्तं पृच्छति, इतरे तु उत्तराणि वदन्ति च।

**पठनप्रवर्तनानि।**

**प्रवर्तनम् - 1 - सभाववाचनम्।**

पठनलक्ष्यम् - आशयमवगच्छति।

छात्राः भावानुसारं पाठभागं वाचयन्ति। सङ्घशः इदं प्रवर्तनं कर्तुं शक्यते। प्रत्येकं छात्रः एकैकं कथापात्रम् इति क्रमेण पाठभागं सस्वरं भावानुसारं कक्ष्यायां अवतारयति। (अर्थम् अवगम्य पुत्री, माता, पिता, मातामही इत्येतेषां वचनानि यथायोग्यं छात्राः नाटकरूपेण अथवा आकाशवाणीनाटकरूपेण अवतारयन्ति।) (ऐ.सि.टि.द्वारा रेडियो नाटकं श्रावयति। अनेन स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्णयाय च अवसरः लभ्यते।)

**मूल्यनिर्णयसूचकानि।**

पदज्ञानम् । आशयव्यक्तता । अवतारणशैली ।

**प्रवर्तनम् - २ - वार्तावतारणम् ।**

पठनलक्ष्यम् - भाषाप्रयोगसामर्थ्यं सम्पादयति। वार्तामवतारयति।

छात्रान् पञ्च षट् वा सङ्घत्वेन वर्गीकरोति। प्रत्येकं सङ्घाङ्गाः पाठभागस्य सम्भाषणं बहुवारं पठित्वा वार्तारूपेण परिवृत्य लिखन्ति। यथासन्दर्भम् अध्यापकः साह्यमाचरति। संघात् एकः वार्तावतारकः भूत्वा कक्ष्यायाम् अवतारयतु। संघस्य इतरे छात्राः वार्तानुगुणं अवतारकस्य पृष्ठतः अभिनयं कुर्वन्तु अथवा वार्तानुकूलतया सिद्धानि चित्राणि प्रदर्शयन्तु।

(इदमेव प्रवर्तनम् दूरवाण्या उत छायाग्राहिण्या चित्रीकृत्य कक्ष्यायां प्रदर्शयितुं शक्यते। चित्रीकरणं सङ्घशः व्यक्तिशः वा कर्तुम् अवसरं कल्पयतु। संस्कृतवार्तावतारणपरिशीलनाय दूरदर्शनस्य वार्तां द्रष्टुं निर्दिशतु च।)

(विद्यालये प्रवर्तमानानां प्रवर्तनानां प्रवर्तनसारं वार्तारूपेण लिखन्तु इति निर्दिशति।)

(वीडियो ओडियो अङ्कनम् सम्पादनं च अधीत्य विविधरङ्गेषु अवसराः सन्ति। वार्तालेखनपटूनां वार्तावतारकसमर्थानां वार्तावाहिन्यादिषु अवसराः सन्ति।)

Draft

मातृका -

नमस्कारः

अयमत्र (वाचकस्य नाम)..............................।

आदौ प्रमुखाः वार्ताः।

व्योमयानं विस्फुट्य आमसोण् वर्षारण्ये निपतिताः चत्वारः सोदराः सजीवाः पुनः प्राप्ताः। सैनिकैः चत्वारिंशत् दिनेभ्यः क्रियमाणं रक्षाप्रवर्तनं सफलं जातम्।

वार्ताः विस्तरेण।

मेई मासस्य प्रथमे दिनाङ्के सान्जोस् नगरं प्रति गच्छत् लघुविमानमेव आमसोण् वर्षवनस्य उपरितले विभग्नमभवत्। विमाने द्वौ वैमानिकौ पञ्च यात्रिकाश्च आसन्। पितरं द्रष्टुं प्रस्थिताः चत्वारः सोदराः तेषां माता च तस्मिन् आसन्। अपघाते द्वौ वैमानिकौ माता मद्दलीना च उपरताः। शिष्टानां बालकानां प्राप्तये सैनिकैः मार्गणं क्रियमाणम् आसीत्। किन्तु प्रकृतिक्षोभेण महता वर्षपातेन ते श्रमाः आदौ विफलाः जाताः। नाविकसेनया कृते अन्वेषणे ते सजीवाः सन्तीति आश्वासकरा वार्ता पूर्वमेव बहिरागता आसीत्। तैः बालैः उपयुक्तानि क्षीरकूपी, भुक्तावशिष्टं फलं, लघुपादरक्षा इत्यादीनि वस्तूनि सेनया काननान्तरालात् परिदृष्टानि आसन्। अन्ततः चत्वारिंशत् दिनानां नितान्तपरिश्रमस्य साफल्यं समभवत्। ते चत्वारः अपि सोदराः सजीवाः पुनःप्राप्ताः। अदृष्टानां बालानां अन्वेषणाय कृतश्रमेषु तद्वंशीयाः द्विशताधिकाः जनाः, नाविकसेनाविभागः सैनिकाः विशेषतया बेल्जियं षपेर्ड् इति घ्राणशक्त्या समर्थः सारमेयः च अभिनन्दनीयाः एव। घटनेयं सहयोगस्य अतिजीवनस्य च सन्देशं यच्छन्ती वर्तते।

**मूल्यनिर्णयसूचकानि।**

लेखने उचिता वार्ताशैली। आशयव्यक्तता। उच्चारणस्फुटता। दृश्यानाम् उचितं सन्निवेशनम्।

**प्रवर्तनम् ३ - पाददटिप्पणीलेखनम्।**

पठनलक्ष्यम् - पाददटिप्पणीं लिखति।

पाठ्यपुस्तके प्रकृतिदुरन्तसम्बन्धीनि त्रीणि चित्राणि दत्तानि सन्ति। तेषां चित्राणाम् अधः उचितं वाक्यं कोष्ठकात् स्वीकृत्य लिखन्ति। यथा - १. मार्गमध्ये पतितं वृक्षं छिनत्ति। २. द्विचक्रिकातः पतितां बालिकां रक्षति। ३. जलोपप्लवात् जनान् रक्षति।

इतोऽपि एतादृशानि चित्राणि प्रदाय वाक्यरचनायै प्रेरयति अध्यापकः। कानिचन चित्राणि

Draft

ऐ.सि.टि.माध्यमेन प्रदर्श्य पादटिप्पणीलेखनाय निर्दिशति।

(स्वयं सन्नद्धस्य छात्रस्य कृते रक्षाप्रवर्तनस्य चित्राणि सञ्चित्य कक्ष्यायां चित्रप्रदर्शिनीं चालयतु। प्राथमिकशुश्रूषां प्रदातुं सन्नद्धः भवतु इति च निर्देशं दातुं शक्यते।) (रक्षाप्रवर्तनेषु उपयुज्यमानानां साङ्केतिकोपकरणानां चित्रकोशस्य निर्माणाय निर्देशं दातुं शक्यते।)

(प्रकृतिदुरन्ते वा कस्मिंश्चित् दुरन्ते क्लेशमनुभूयमानस्य कस्यचित् गृहं संदृश्य तेन सह सम्भाषणं कृत्वा तस्मै यथाशक्यं साह्यं च करोतु। ततः तदनुभववृत्तान्तं टिप्पणीपुस्तके लिखतु।)

(रक्षाप्रवर्तनतत्पराणां कृते आरक्षकविभागेषु अवसराः सन्ति।)

(**पठनानुभवविपुलीकरणाय** अतिजीवनस्य अनुभवान् प्रतिपादयन् आटुजीवितम् इति ग्रन्थः कैरल्यां बेन्यामिन् इत्यनेन विरचितः। मालुट्टी, मलयन्कुञ्ञ्, २०१८, मञ्ञुम्मल् बोइस्, आटुजीवितम् इत्यादीनि मलयालचलच्चित्राणि अतिजीवनस्य सहयोगस्य च कथाः प्रतिपादयन्ति।)

**मूल्यनिर्णयसूचकानि।**

उचितं वाक्यचयनम्। आशयग्रहणसामर्थ्यम्।

**प्रवर्तनम् ४ - लङ् लकारलेखनम्।**

पठनलक्ष्यम् - लङ्लकारज्ञानं सम्पादयति।

लट् लकारे दत्तानि पदानि उदाहरणानुसारं लङ् लकारे परिवर्त्य लिखति।

| | | | |
|---|---|---|---|
| यथा - | धावति | - | अधावत्। |
| | भवति | - | अभवत्। |
| | पठति | - | अपठत्। |
| | गच्छति | - | अगच्छत्। |
| | लिखति | - | अलिखत्। |
| | पिबति | - | अपिबत्। |
| | खादति | - | अखादत्। |
| | वदति | - | अवदत्। |
| | पश्यति | - | अपश्यत्। |

Draft

चलति - अचलत्।

गायति - अगायत्।

(लट्-लङ् लकारयोः पट्टिकां सज्जीकृत्य ऐ.सि.टि.द्वारा प्रदर्शयति।)

**मूल्यनिर्णयसूचकानि।**

उचितं परिवर्तनम्। लकारज्ञानम्।

**अग्रिमपाठसंयोजकं प्रवर्तनम्।**

स्नेहेन वर्धते विश्वम्। विश्वस्यास्य आधारः स्नेह एव। परस्पराश्रयेण स्नेहेन एव लोकोऽयं प्रवर्तते। स्नेहस्य विविधानि मुखानि सन्ति। वात्सल्यम्, कारुण्यम्, अनुतापः, सौहृदम्, साहोदर्यम् इत्यादिभावाः स्नेहस्य विविधतायाः उदाहरणानि सन्ति।

**अनुबन्धः।**

सामूहिकजीवने प्रत्येकं मानवेन परस्परसहकरणेन परस्परस्नेहेन एव भाव्यम्। अन्यथा जीवनं दुष्करं स्यात्। स्वकीयेषु कार्येषु व्यस्ताः जनाः परस्परं अजानन्तः अपश्यन्तः जीवनं कुर्वन्ति। तस्मात् विरम्य परितः विद्यमानेषु सहजीविषु सौहार्देन साहाय्यहस्तेन च जीवनं नेतुं प्रेरयति अयं पाठभागः। आपदि बद्धानां रक्षणाय स्वयमेव उद्युक्तो भवितुं योग्यः भवेत् प्रत्येकं छात्रः। तदानीमेव समूहस्य पुरोगतिः सुखेन साध्या भविष्यति।

अस्माकं जीवने यदा कदापि अपघाताः भवितुम् अर्हन्ति। तत्र रक्षाप्रवर्तनाय समर्थाः जनाः अपेक्षिताः एव। सेवातत्पराणां मानवानां समूहः अत्यन्तापेक्षित एव। पारस्पर्येण सहयोगेन च दुरन्तमुखेषु रक्षाप्रवर्तनं कर्तुं शक्यते। अस्माकं सम्मुखे जायमाने अपघाते निर्भयत्वेन सेवामनोभावेन रक्षाप्रवर्तनं विधातुं वयं सर्वदा समर्थाः सन्नद्धाः च भवेम। विद्यालयेषु जे.आर्.सि., एस्.पि.सि., एन्.एस्.एस्, एस्.एस्.एस् इत्यादिपद्धतयः प्रवर्तमानाः सन्ति। तत्र भागभाजः भूत्वा छात्रेषु अपि तादृशमनोभावः उत्पद्येत।

आमसोण्-वर्षवनस्य अन्तर्भागे प्रवृत्तं रक्षाप्रवर्तनमेव इह पठितम्। आमसोण् वर्षवनस्य अवस्था इदानीं दुष्टा भवति। वनमिदं वननशीकरणस्य निदर्शनं भवति। न केवलं आमसोण् वनस्य ईदृशी स्थितिः, सर्वत्र विश्वे वनसंरक्षणस्य विषये तावती श्रद्धा न दृश्यते। अतः वनसंरक्षणविषये छात्राः जागरूकाः भवन्तु। परिसरस्य संरक्षणे परिशीलनं दीयमानाः एक्को क्लब्ब्, कार्षिकसमितिः, फोरस्ट्रि क्लब् इत्याद्याः समितयः विद्यालयेषु प्रवर्तन्ते। तत्र छात्राः सदस्याः भवन्तु। तद्वारा प्रकृत्यनुकूलविचारवन्तः भवन्तु छात्राः। विश्वविख्यातायाः स्वीडिष् परिस्थितिप्रवर्तकायाः ग्रेट्टा तन्बर्गा महाभागायाः जीवनचरितमपि अधिकवाचनाय छात्रेभ्यः दातुं शक्यते।

Draft

**पदार्थाः -**

| | | |
|---|---|---|
| प्रयुतम् | - | പത്ത് ലക്ഷം |
| हृदयान्तराले | - | ഹൃദയത്തിന്റെ ഉള്ളിൽ |
| जनपदः | - | ഗ്രാമം |
| मार्गमध्ये | - | വഴിയിൽ |
| यानभङ्गेन | - | വാഹനം തകർന്ന് |
| वैमानिकः | - | പൈലറ്റ് |
| निरालम्बाः | - | ആരുമില്ലാത്തവർ |
| सजीवाः | - | ജീവനുള്ളവർ |
| अवगतम् | - | മനസ്സിലാക്കി |
| भुक्तावशिष्टम् | - | കഴിച്ചതിന്റെ ബാക്കി |
| लब्धानि | - | കിട്ടിയവ |
| व्यर्थः | - | പ്രയോജനമില്ലാത്തത് |
| सफला | - | പ്രയോജനപ്പെട്ടത് |
| अविस्मरणीयः | - | മറക്കാൻ കഴിയാത്തത് |
| रोमहर्षजनकम् | - | രോമാഞ്ചമുണ്ടാക്കുന്നത് |
| दीप्तः | - | ശോഭിക്കുന്നത് |

क्रियापदानि

श्रूयते - श्रु श्रवणे कर्मणि.लट्.प्र.पु.ए.व.।

अकुर्वन् - डुकृञ् करणे, पर.लङ्.प्र.पु.ब.व.।

अजायन्त – जनी प्रादुर्भावे,आत्म.लङ्.प्र.पु.ए.व.।

अभवत्-भू सत्तायां, पर.लङ्.प्र.पु.ए.व.

नामपदानि

सुस्थितेः - इ.स्त्री.ष.ए.व.।

Draft

नाविकसेनया - आ.स्त्री.तृ.ए.व.।

चिह्नैः - अ.नपुँ.तृ.ब.व.।

सर्वेषाम् - अ.पु.ष.ब.व.।

पर्यायपदानि

सारमेयः - कौलेयकः, कुक्कुरः, मृगदंशकः।

वनम् - अटवी, अरण्यम्, विपिनम्, गहनम्, काननम्।

Draft

# पाठः - ३

# भ्रातृस्नेहः।

| | |
|---|---|
| आशयः | मानविकता |
| उपाशयः | स्नेहः। |
| व्यवहाररूपम् | काव्यांशः। |
| उद्देश्यानि/लक्ष्याणि | सोदरभावना मानवानां कृते अनिवार्या भवति।<br>सर्वे सोदराः इति चिन्तयन्तः भवन्ति छात्राः। |
| मूल्यम् / मनोभावः | दीनदयालुत्वम्।<br>साहोदर्यम्।<br>सहिष्णुता। |
| पठनलक्ष्याणि | काव्यभागंताललयानुसारं आलपति।<br>अन्वयं लिखति।<br>लघुटिप्पणीं लिखति।<br>प्रश्नानामुत्तराणि लिखति।<br>वाक्यानि रचयति। |
| पठनक्षमता | काव्यास्वदनतात्पर्यं वर्धते।<br>रचनासामर्थ्यं वर्धते। |
| कालांशः | १४ |

**पाठस्य आमुखम्।**

संस्कृतसाहित्ये आदिकाव्यत्वेन प्रसिद्धः इतिहासग्रन्थः भवति वाल्मीकिविरचितं रामायणम्। रामायणे सप्त काण्डानि सन्ति। रामस्य चरितमेव सम्पूर्णं रामायणे प्रतिपादितं वर्तते। लोके व्यवहारमर्यादीदीन् बोधयितुं रामायणकाव्यं उदाह्रियते। रामायणे बहुविधानां व्यवहारप्रकाराणां मातृकाः सन्ति। भार्याभर्तृव्यवहारः, राजाप्रजाव्यवहारः, पितृपुत्रव्यहारः, मातृपुत्रव्यवहारः, सोदरव्यवहारः इत्येवं सर्वेषामपि उदाहरणानि काव्येऽस्मिन् विद्यन्ते। स्नेहः, दया, बन्धुत्वम्, मैत्री, अनुकम्पा, वात्सल्यम् इत्यादीनाम् उदात्तभावानां सामञ्जस्यप्रयोगेण रामायणमिदं लोकोत्तरतां भजते। पितृवाक्यपालनाय रामः अटवीं

Draft

पत्न्या सोदरेण च साकं प्राप्नोति। ततः रावणः सीताम् अपहरति। सीतामन्विष्य रामः लक्ष्मणः च सर्वत्र सञ्चरति। मध्येमार्गं मिलितेन हनुमता सुग्रीवं प्राप्तवन्तौ तौ सुग्रीवसख्यं कुरुतः। रामः सुग्रीवं किष्किन्धायाः राजानं करोति । तदनु सीतान्वेषणाय चतुर्षु दिक्षु वानरसैन्यं प्रयाति। जाम्बवान् हनुमान् इत्यादिप्रसिद्धानां सङ्घः दक्षिणभागं गच्छति। समुद्रतीरं प्राप्ताः ते कस्मिंश्चित् गह्वरे पक्षविहीनं सम्पातिं पश्यन्ति। सः सीतान्वेषणे निर्णायकं वृत्तान्तं ज्ञापयति च। सम्भाषणमध्ये सम्पातिः स्वस्य पूर्ववृत्तान्तं हनुमदादिवानरश्रेष्ठान् श्रावयति। सम्पातिः जटायुः च भ्रातरौ पक्षिणौ आस्ताम्। भ्रातृस्नेहस्य हृदयस्पर्शकोऽयं भागः।

**प्रवेशकप्रवर्तनम्।**

पाठपुस्तके एकं चित्रं दत्तमस्ति। तस्मिन् पुराणानि, वेदाः, महाभारतम्,पञ्चतन्त्रम्, रघुवंशः, रामायणम् इत्यादिग्रन्थानां नामानि अङ्कितानि सन्ति। अध्यापकः काञ्चन प्रश्नान् पृच्छति। अत्र के के ग्रन्थाः दृश्यन्ते ? इतिहासग्रन्थौ कौ? आदिकाव्यं किम्? एतेषां प्रश्नानाम् उत्तराणि छात्राः यथामति वदेयुः। तानि क्रोडीकृत्य अद्य रामायणस्य कतिपयश्लोकान् पठामः इति कथयित्वा पाठभागं प्रविशति।

**पाठपद्ग्रथनम्।**

भ्रातृस्नेहः इत्यस्मिन् पाठभागे रामायणस्य किष्किन्धाकाण्डात् स्वीकृताः चत्वारः श्लोकाः समाकलिताः सन्ति। सन्दर्भेऽस्मिन् सम्पातिः वानरान् प्रति वदति। अरुणस्य महाश्वेतायाः च द्वौ पुत्रौ अभवताम् सम्पातिः जटायुः इति। महाश्वेतायाः श्येनी इति च नामान्तरमस्ति। श्येनी पक्षिणी भवति। सम्पातिः जटायुः च अतिशक्तिमन्तौ पक्षिश्रेष्ठौ भवतः। एकदा तयोर्मध्ये स्पर्धा सञ्जाता। कारणं तु कः अधिकं ऊर्ध्वं डयेत इति। उभावपि सूर्यमण्डलं प्रति उड्डयेते स्म। जटायुः सम्पातेः उपरि वेगेन अडयत। किन्तु उष्णाधिक्येन सः विवशः अभवत्। तदानीं भ्रातृस्नेहेन सम्पातिः स्वस्य पक्षं विस्तार्य जटायुषः उपरि उड्डीय अनुजाय छायामदात्। दग्धपक्षः सम्पातिः विन्ध्यापर्वतस्य वनान्ते कुत्रचित् पतितः अभवत्। तत्र तपःकुर्वतः निशाचरमुनेः संरक्षणे सः शिष्टकालम् अनयत्। सूर्यमुखात् विश्लेषितौ तौ भ्रातरौ पुनः कदापि न मिलितवन्तौ।

**चित्राणां विशदीकरणम्।**

जटायुः सम्पातिः च सूर्याभिमुखं गच्छतः।(पुटसंख्या - 19)

जटायुः सूर्याघातेन श्रान्तः जायते। (पुटसंख्या -20)

जटायुषं रक्षितुं सम्पातिः पक्षौ विस्तार्य तस्योपरि डयते। तस्य पक्षौ सूर्यकिरणैः भस्मीकृतौ

Draft

जायेते।(पुटसंख्या -21)

## पठनप्रवर्तनानि।

**प्रवर्तनम् १ - श्लोकालपनम्।**

पठनलक्ष्यम् - काव्यभागं ताललयानुसारं आलपति।

पाठभागस्य श्लोकान् छात्राः सङ्घशः व्यक्तिशः च सतालम् आलपन्तु। (सङ्गीताध्यापकस्य साह्यं स्वीकर्तुं शक्यते।) (ऐ.सि.टि.द्वारा सस्वरालपनं श्रावयितुम् अर्हति। तथा च चित्रसङ्कलनं कृत्वा पाठभागस्य वीडियोनिर्माणं च कर्तुं शक्यते।) (छात्रैः काव्यांशम् आलपित्वा रेकोर्ड् कृत्वा कक्ष्यायाम् अवतारयितुं शक्यते। अनेन स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्णयाय च अवसरः वर्तते।)

**मूल्यनिर्णयसूचकानि।**

उचितः तालः। अक्षरस्फुटता। आशयावबोधः।

**प्रवर्तनम् २ - अन्वयलेखनम्।**

पठनलक्ष्यम् - अन्वयं लिखति।

श्लोकं पठित्वा प्रश्नावलिं निर्माय तद्वारा आशयं गृहीत्वा छात्राः स्वयं गद्यक्रमं लिखन्तु। पाठ्यपुस्तके मातृकाप्रश्नाः दत्ताः सन्ति। तान् प्रश्नान् पठित्वा श्लोकात् आशयम् अवगच्छेयुः। ततः पश्चात् गद्यक्रमलेखनाय यत्नं कुर्वन्तु। सर्वेषां श्लोकानां अन्वयलेखने एषः श्रमः अनुवर्तताम्।

**मूल्यनिर्णयसूचकानि।**

आशयावबोधः। उचितभाषाप्रयोगः। पदानाम् अर्थावबोधः।

**प्रवर्तनम् ३ - लघुटिप्पणीलेखनम्।**

पठनलक्ष्यम् - लघुटिप्पणीं लिखति।

साहोदर्यम् इत्यस्मिन् विषये सङ्घशः चर्चां कृत्वा लघुटिप्पणीं लिखति। अध्यापकः यथोचितं साह्यं च आचरति।

Draft

मातृका –

## साहोदर्यम्।

स्नेह एव जीवनस्याधारः। स्नेहं विना जीवितं व्यर्थमेव। सोदरः सदा अस्मभ्यं स्नेहदायकः मार्गदर्शी च भवति। जीवनस्य विविधेषु सन्दर्भेषु सोदरसमानाः बहवः जनाः अस्माकं कृते सहायहस्ताः भवन्ति। विद्यालयेषु सहपाठिनः, समाजे समीपगृहस्थाः, कार्यालयेषु सहप्रवर्तकाः इत्येवं गच्छति सहोदरतुल्यानां पट्टिका। जीवनविजये एतेषां साहोदर्यं अनुभूताः भवन्ति अस्मासु बहवश्च। अतः सर्वेषु प्राणिषु परस्परस्नेहः, सोदरभावः च भवेत्।

एवं च अधिकतया स्नेहविषये पठितुं इमे सन्दर्भाः उपकारकाः भवन्ति। कुमारनाशान् महाशयस्य चण्डालभिक्षुकीनामके काव्ये वर्तमानाः स्नेहमहत्त्वसूचकाः श्लोकाः। नारायणगुरोः आत्मोपदेशशतके वर्तमानाः स्नेहसम्बन्धाः श्लोकाः।)

स्वयं सन्नद्धस्य छात्रस्य कृते अपरस्य रक्षणाय आत्मसमर्पणं कर्तुमुद्युक्तानां महात्मनां कथाः चित्राणि च सञ्चित्य सम्पुटं निर्मातु इति निर्देशं दातुं शक्यते।)

**मूल्यनिर्णयसूचकानि।**

भागभागित्वम्। उचितभाषाप्रयोगः। उचितवाक्यघटना।

**प्रवर्तनम् ४ - प्रश्नोत्तरलेखनम्।**

पठनलक्ष्यम् - प्रश्नानामुत्तराणि लिखति।

पाठपुस्तके पाठामुखकथा गद्यरूपेण दत्तास्ति। गद्यांशं पठित्वा दत्तानां प्रश्नानाम् उत्तराणि लिखति।

१. सम्पातेः जटायुषः च मध्ये स्पर्धा अजायत।

२. जटायुषः वचनम्।

३. वेगपरीक्षया सामर्थ्यं ज्ञापयामि।

४. सम्पातिः अवदत्।

५. सम्पातिः जटायुः च आकाशमार्गेण उड्डयितुम् आरब्धवन्तौ।

(अत्र कांश्चन प्रश्नान् अपि दातुं शक्यते।)

१. आदिकाव्यं किम्? रामायणम्।

Draft

२. रामायणे कति काण्डानि सन्ति? सप्त।

३. भ्रातरौ पक्षिणौ कौ? सम्पातिः जटायुः च।

४. पाठभागोऽयं रामायणस्य कस्मिन् काण्डे भवति? किष्किन्धाकाण्डे।

५. कः अवसीदति? जटायुः।

६. कः भ्रातरं छादयामास ? सम्पातिः।

७. अहम् विन्ध्ये पतितः। अत्र कर्तृपदं किम्? अहम्।

८. नोपलक्षये - अत्र पदच्छेदः कः? न+उपलक्षये।

एतैः प्रश्नैः छात्रेषु अन्वेषणसामर्थ्यं वर्धयितुं शक्यते।

**मूल्यनिर्णयसूचकानि।**

आशयावबोधः। उचितोत्तरचयनम्। उचितपदप्रयोगः।

**प्रवर्तनम् ५ - वाक्यरचना।**

पठनलक्ष्यम् -वाक्यानि रचयति।

च, पुरा इति अव्ययपदानि उपयुज्य वाक्यानि परिवर्त्य लिखति।

यथा -

दिलीपः रामायणं पठति। दिलीपः महाभारतं पठति।

दिलीपः रामायणं महाभारतं च पठति।

लता कथां कवितां च लिखति।

सुरेशः क्षीरं फलसारं च पिबति।

यमुना गजं सिंहं च पश्यति।

प्रिया रेखा च धावति।

चिक्रोडः काकः च वृक्षे उपविशति।

यथा -

इदं फलं वृक्षे आसीत्। फलं कण्डोले अस्ति।

पुरा इदं फलं वृक्षे आसीत् इदानीं कण्डोले अस्ति।

Draft

पुरा अयं सिंहः वने आसीत् इदानीं जन्तुशालायाम् अस्ति।

पुरा मार्जारः महानसे आसीत् इदानीं गृहाङ्गणे अस्ति।

पुरा अमलः बालकः आसीत् इदानीं युवकः अस्ति।

पुरा विद्यालयः दुरवस्थायाम् आसीत् इदानीं हैटेक् अस्ति।

पुरा वार्धक्यवृत्तिः अल्पा आसीत् इदानीम् अधिका अस्ति।

**मूल्यनिर्णयसूचकानि।**

प्रयोगचातुर्यम्। उचितं परिवर्तनम्। उचितवाक्यरचना।

**अग्रिमपाठसंयोजकं प्रवर्तनम्।**

नीत्यनुसारेण जीवितयात्रा कार्या। नीतिरवश्यं सर्वैः ज्ञेया। नीत्यनुसारेण सुखप्राप्तिः जायते इत्यतः भारतस्य राज्याङ्कम् (Constitution) अधिकृत्य ज्ञानमार्जनीयम्।

**अनुबन्धः।**

**वृत्रवधः।**

प्रथमे श्लोके वृत्रवधे इति पदम् विद्यते। अनेन पदेन यदा वृत्रवधः प्रवृत्तः तदा इत्येव अर्थः बुध्यते। सम्पातिः जटायुः च यस्मिन् काले सूर्यमण्डलं प्रति डयनं अकुरुताम् समाने काले एव लोके वृत्रासुरस्य वधः अभवत्। सम्पातिजटायुषोः बाल्यकाले एव वृत्रासुरवधोऽभवत् इति वानरश्रेष्ठान् बोधयितुम् एव 'वृत्रवधे वृत्ते' इति वाल्मीकिना प्रयुक्तम्। अन्यथा वृत्रवधेन सह सम्पातिजटायुषोः न कोऽपि सम्बन्धः विद्यते।

वृत्रासुरस्य कथा एवं भवति। चित्रकेतुनामकस्य साम्राजः पुनर्जन्म भवति वृत्रः। ब्रह्मणा नारदेन च आत्मज्ञानम् उपदिष्टः चित्रकेतुः ध्याननिरतः अष्टदिनानि अनयत्। ततः सः गन्धर्वत्वं प्राप। गन्धर्वः सन् आकाशमार्गेण सञ्चरन् सः परमशिवस्य अङ्के उपविशन्तीं पार्वतीं ददर्श। तद्दृष्ट्वा चित्रकेतुः अहसत्। तच्छ्रुत्वा पार्वती 'त्वम् असुरो भव' इति चित्रकेतुं शशाप। एवं चित्रकेतुः वृत्रासुरत्वेन जन्म लेभे। (भागवतम् षष्ठस्कन्धम्)

इन्द्रः त्वष्टप्रजापतिः च वैरिणौ आस्ताम्। त्वष्टप्रजापतेः त्रिशिरः अथवा विश्वरूपः इति पुत्रः अजायत। विश्वरूपस्य माता असुरस्त्री आसीत्। अत एव तस्य असुरेषु सौहृदम् आसीत्। तज्ज्ञात्वा इन्द्रः विश्वरूपं ममार। स्वपुत्रं विना कारणं मारितवतः देवेन्द्रस्य वधाय त्वष्टप्रजापतिः अपरं गभीरं असुरं पुत्रं ससर्ज। स एव वृत्रासुरः। (देवीभागवतम् षष्ठस्कन्धम्)

वृत्रासुरः अतीव बलवान् वीर्यवान् तेजोमयश्चासीत्। देवेन्द्रः अपि तस्मात् बिभेति स्म। अतः सः वृत्रासुरेण सह सख्यं चकार। स्वस्य अधिकारस्य अर्धं वृत्राय ददौ च। व्याजसख्येन वृत्रवधं एव देवेन्द्रः लक्षीकृतवान्। सः अप्सरस्त्रियं रम्भां वृत्रासुरस्य वधाय अवसरं कल्पयितुं न्ययुङ्क्त। रम्भा नन्दनोद्याने वृत्रं वशीकृत्य मद्यं प्रदाय नष्टसंज्ञम् अकरोत्। तस्मिन्नवसरे इन्द्रः वज्रायुधेन वृत्रासुरं ममार। (पद्मपुराणम्, भूमीखण्डम्, 23, 84 अध्यायाः)

पदार्थाः -

| | | |
|---|---|---|
| नामान्तरम् | - | മറ്റൊരു പേര് |
| भ्राता | - | സഹോദരൻ |
| श्रान्तः | - | ക്ഷീണിച്ചവൻ |
| उड्डयताम् | - | പറക്കൂ |
| स्पर्धा | - | മത്സരം |

क्रियापदानि

स्वः - अस भुवि.पर.लट्.उ.पु.द्वि.व.।

अवसीदति - अव षिद्लृ विशरणगत्यवसादनेषु, पर.लट्.प्र. पु.ए.व.।

छादयामास – छद् संवरणे, पर.लिट्.प्र.पु.ए.व.।

उपलक्षये - उप लक्ष दर्शनाङ्कनयोः, आत्म.लट्.उ.पु.ए.व.।

नामपदानि

जयैषिणौ - नकारान्तः पुँ.प्र.द्वि.व.।

जटायुः - सकारान्तः पुँ.प्र.ए.व.।

भ्रातरम् - ऋकारान्तः पुँ.द्वि.ए.व.।

अव्ययानि

जवेन, भृशम्।



Draft

Draft

# एककम् – २

# नैतिकता।

नैतिकता नामकेऽस्मिन् एकके पाठत्रयं समायोजितम्। स्वातन्त्र्यम्, धर्मेतरत्वम्, समत्वम् इत्यादीनि मूल्यानि सर्वथा परिपालनीयानि भवन्ति। एतादृशानां मूल्यानां प्राधान्यद्योतकाः भवन्ति एककेऽस्मिन् अन्तर्भूताः नीतिबोधो महत्तमः, सूक्तिरत्नानि, सः स्वप्नोऽपि पुष्पितः इति पाठाः।

# पाठः- ४
# नीतिबोधो महत्तमः।

| | |
|---|---|
| आशयः | भरणघटनामूल्यानि। |
| उपाशयः | नीतिबोधः। |
| व्यवहाररूपम् | चित्रकथा। |
| उद्देश्यानि/लक्ष्याणि | राष्ट्रहिताय जीवनविजयाय च नीतिबोधःआवश्यकः।<br>छात्राः नीतियुक्ताः भवन्ति। |
| मूल्यम् / मनोभावः | देशस्नेहः।<br>नीतिबोधः। |
| पठनलक्ष्याणि | भावानुसारं वाचयति।<br>आशयानुसारं सम्भाषणं पूरयति।<br>कथासम्पुटं रचयति।<br>सन्धियुक्तपदानां पदच्छेदं लिखति।<br>आशयसम्पुष्टानि वाक्यानि रचयति।<br>क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि लिखति। |
| पठनक्षमता | संस्कृतभाषया सम्भाषणं करोति।<br>संस्कृतभाषया वाक्यानि रचयति। |
| कालांशः | १२ |

**पाठस्य आमुखम्।**

संस्कृतसाहित्ये अनेके कथाग्रन्थाः सन्ति। वेदकालादारभ्य इतःपर्यन्तं विरचितेषु ग्रन्थतल्लजेषु व्याप्तं भवति संस्कृतकथासाहित्यम्। अत्र महाभारतादयः तु कथासाहित्यस्य सम्पुष्टभूमिश्च भवति। महाभारते विद्यमानं काञ्चन कथामवलम्ब्य रचितो भवति नीतिबोधो महत्तमः इति कथा।

कालेऽस्मिन् सामाजिकसुस्थितिः अत्यन्तापेक्षिता भवति। यदि मानवाः स्नेहेन समभावनया, सहवर्तित्वेन च जीवन्ति तर्हि एव तादृशस्थितिविशेषः सम्भवति। तदर्थम् अस्माकं भरणघटनामूल्यानि अपि पालनीयानि भवन्ति। मानवैः सर्वैः सर्वदा राष्ट्रहिताय

Draft

नीतियुक्तानि कार्याणि करणीयानि इति आशयः अनया कथया प्रतिपाद्यते।

**प्रवेशकप्रवर्तनम्।**

पाठभागे विद्यमानं नीतिदेवतायाः चित्रं प्रदर्शयति। अस्मिन् चित्रे विद्यमानं शिल्पं कुत्र दृश्यते? अनेन किं सूचयति? इत्यादयः कांश्चन प्रश्नान् पृष्ट्वा चर्चां कारयति। अस्माकं न्यायालयेषु दृश्यमानमिदं शिल्पं नीतिपीठस्य नीतिबोधं ज्ञापयति इति चर्चाम् उपसंहरति।

**पाठापग्रथनम्।**

कोसलाधिपः क्षेमदर्शी राज्यपरिपालने मग्नः अभवत्। स्वस्य सचिवेषु अतीव विश्वासयुक्तः राजा तेषां सचिवानां कापट्यं न जानाति। सचिवाः सर्वे राज्यकोशात् धनमपहृत्य ससुखं वसन्तः आसन्। कार्यमिदं राजानं निवेदयितुं कश्चन भटः वेषप्रच्छन्नः भूत्वा मुनिरूपेण आगत्य कार्याणि सर्वाणि राजानं बोधयति। अन्ते मुनिवेषधारी स्वस्य भट एवेति विज्ञाय तं प्रशंसति।

**चित्राणां विशदीकरणम्।**

अयं पाठभागः चित्रकथारूपेण भवति। अतः प्रत्येकं पुटेषु बहूनि चित्राणि सन्ति। चित्राणाम् आशयम् अवगन्तुं योग्यानि उचितानि कथावाक्यानि एव तत्र तत्र दत्तानि सन्ति।

**पठनप्रवर्तनानि।**

**प्रवर्तनम् १ - पाठभागस्य अवतारणम्।**

पठनलक्ष्यम् - भावानुसारं वाचयति।

कथापात्रानुसारं पाठभागस्य वाचनाय छात्रान् परिशीलयति। अन्ते तदनुसारं कक्ष्यायां पाठभागस्य अवतारणाय निर्दिशति।

(कथाभागं भावानुसारं वाचयित्वा शब्दाङ्कनं कृत्वा कक्ष्यायां श्रावयतु इति निर्देशं दातुं शक्यते।)

**मूल्यनिर्णयसूचकानि।**

उचितः भावः। आशयावबोधः। उच्चारणशुद्धिः।

**प्रवर्तनम् २ - सम्भाषणपूरणम्।**

पठनलक्ष्यम् - आशयानुसारं सम्भाषणं पूरयति।

Draft

मुनेः राज्ञः च सम्भाषणांशः दत्तः अस्ति। तत्र रिक्तस्थानेषु पूरणाय आवश्यकानि पदानि कोष्ठके दत्तानि सन्ति। तानि उपयुज्य मुनेः राज्ञश्च सम्भाषणपूरणाय छात्रान् निर्दिशति।

मातृका -

| | | |
|---|---|---|
| भटः | - | वन्दनम् महाराज! |
| राजा | - | वन्दनम्, हे भट किमर्थं मुनिवेषं धृतवान्। |
| भटः | - | राज्यस्य रक्षणार्थं धृतवानस्मि। |
| राजा | - | उत्तमम्। भवतः नीतिबोधः प्रशंसार्हः। |
| भटः | - | राज्यस्य संरक्षणं मम कर्तव्यं भवति। |
| राजा | - | प्रीतोऽस्मि। |
| भटः | - | धन्यवादाः। |
| राजा | - | अस्तु। |

(अवतारणसमये स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्णयाय च अवसरः वर्तते।)

(लघुसम्भाषणक्रीडा - संस्कृतमाधुर्याः सम्भाषणपुस्तकम् उपयुज्य विविधेषु सन्दर्भेषु विद्यमानानां सम्भाषणानां परिचायनम्। विशेषप्रवर्तनरूपेण नूतनसम्भाषणलेखनम्, नूतनवाक्यलेखनम्, चित्राणि विरच्य पादटिप्पणीलेखनम् इत्यादि च दातुं शक्यते।)

**मूल्यनिर्णयसूचकानि।**

उचितपदस्य स्वीकरणम्। आशयानुसारं योजनम्। भाषणशैली।

**प्रवर्तनम् ३ - कथासम्पुटरचना।**

पठनलक्ष्यम् - कथासम्पुटं रचयति।

पञ्चतन्त्रम्, कथासरित्सागरः, कथाकदम्बः, कथामालिका (संस्कृतमाधुरी) इत्यादिषु ग्रन्थेषु विद्यमानाः समानाशययुक्ताः कथाः सञ्चित्य कथासम्पुटरचनायै छात्रान् निर्दिशति। तदर्थं पूर्वोक्ताः कथाग्रन्थाः प्रदर्श्यन्ते।

(इतरभाषासु विरचिताः समानाशययुक्तकथाः स्वीकृत्य सम्पुटं रचनाय निर्देशं दातुं शक्यते।)

(कथाः भरणघटनामूल्यानि इत्यनयोः विषये विद्यालये संगोष्ठीम् अवतारयितुं शक्यते।)

Draft

**मूल्यनिर्णयसूचकानि।**

समानाशययुक्तानां कथानां चयनम्। सम्पुटघटना। आकर्षणीयता।

**प्रवर्तनम् ४ - पदच्छेदलेखनम्।**

पठनलक्ष्यम् - सन्धियुक्तपदानां पदच्छेदं लिखति।

सूचनानुसारं पदच्छेदलेखनाय छात्रान् निर्दिशति।

यथा -

| | | |
|---|---|---|
| मुनिस्तत्र | = | मुनिः + तत्र। |
| बालस्तदा | = | बालः +तदा। |
| ग्रामस्तत्र | = | ग्रामः +तत्र। |
| छात्रस्तु | = | छात्रः + तु। |
| पुत्रस्तस्मिन् | = | पुत्रः + तस्मिन् |
| भवतस्तक्रम् | = | भवतः + तक्रम् |
| एकोऽपि | = | एकः + अपि |
| पुत्रोऽपि | = | पुत्रः + अपि |
| ग्रामोऽयम् | = | ग्रामः + अयम् |
| बालोऽस्तु | = | बालः + अस्तु। |
| प्रीतोऽस्मि | = | प्रीतः + अस्मि। |
| देशोऽयम् | = | देशः + अयम्। |

(समानसन्दर्भेषु पदच्छेदं कर्तुं छात्राणां निर्धारणसामर्थ्यं लभ्यते।)

**मूल्यनिर्णयसूचकानि।**

उचितं पदच्छेदलेखनम्। पदबोधः। अर्थावबोधः।

**प्रवर्तनम् ५ - वाक्यरचना।**

पठनलक्ष्यम् - आशयसम्पुष्टानि वाक्यानि रचयति।

पाठपुस्तके निर्दिष्टस्थाने दत्तानि पदानि उपयुज्य सार्थकानां

वाक्यानां रचनायै छात्रान् प्रेरयति। आवश्यकतानुसारं साहाय्यमपि करोति। यथा -

सः भटः भवति। सः कृष्णः भवति। सः काकः भवति।
सा दिव्या भवति। सा अम्बा भवति। सा अध्यापिका भवति।
तत् धनं भवति। तत् पुष्पं भवति। तत् वाहनं भवति।

**मूल्यनिर्णयसूचकानि।**

विशेषणविशेष्याणां समानलिङ्गत्वम्। आशयपूर्णता। वाक्यघटना।

**प्रवर्तनम् ६ - पट्टिकाकरणम्।**

पठनलक्ष्यम् - क्त्वान्त-ल्यबन्त-तुमुन्नन्तानि लिखति।

क्त्वान्तल्यबन्ततुमुन्नन्तानाम् अव्ययानां पट्टिकाकरणम्।

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| गृहीत्वा | अपहृत्य | वक्तुम् |
| ज्ञात्वा | परित्यज्य | निवेदयितुम् |

मातृकाः -

| | | |
|---|---|---|
| भूत्वा | सम्भूय | भवितुम् |
| पठित्वा | प्रपठ्य | पठितुम् |
| हृत्वा | अपहृत्य | अपहर्तुम् |
| ज्ञात्वा | विज्ञाय | ज्ञातुम् |
| गृहीत्वा | संगृह्य | ग्रहीतुम् |
| लिखित्वा | विलिख्य | लेखितुम् |
| त्यक्त्वा | परित्यज्य | परित्यक्तुम् |
| गत्वा | निर्गम्य | गन्तुम् |

**मूल्यनिर्णयसूचकानि।**

उचितं लेखनम्। अव्ययावबोधः। अर्थावबोधः।

Draft

**अग्रिमपाठसंयोजकं प्रवर्तनम्।**

(वसुधैव कुटुम्बकम्॥)

अयं निजः परो वेति
गणना लघुचेतसाम्।
उदारचरितानां तु
वसुधैव कुटुम्बकम्॥

सुभाषितमिदं स्वार्थतां त्यक्त्वा जीवनं करणीयमिति उद्घोषयति। समाजस्य प्रगत्यर्थं सर्वे मानवाः परस्परं स्नेहेन सोदरभावेन समत्वादिचिन्तया च युक्ताः भवेयुः। एतादृशमूल्यानां बोधनाय संस्कृतसाहित्ये इतरभाषासाहित्ये च अनेकानि सुभाषितानि वचनानि च सन्ति। तदर्थं सहायकः भवति अग्रिमः पाठः।

**अनुबन्धः।**

पदार्थाः -

| | | |
|---|---|---|
| नैतिकता | - | നീതിസംബന്ധമായത് |
| अव्यवस्था | - | വ്യവസ്ഥയില്ലാത്തത് |
| बहुस्वरता | - | നാനാത്വം |
| क्षेमदर्शी | - | ക്ഷേമതത്പരൻ |
| निवेदयितुम् | - | അറിയിക്കുവാൻ |
| आज्ञा | - | നിർദ്ദേശം |
| रहसि | - | ഏകാന്തതയിൽ |
| आहूय | - | വിളിച്ചിട്ട് |
| परित्यज्य | - | ഉപേക്ഷിച്ചിട്ട് |
| प्रशंसति | - | അഭിനന്ദിക്കുന്നു |
| विगणय्य | - | പരിഗണിക്കാതെ |
| आत्मवृत्तिः | - | സ്വന്തം പ്രവൃത്തി |
| मनीषिणः | - | ബുദ്ധിമാന്മാർ |

Draft

अन्यतमः - അനേകരിൽ ഒരാൾ

पालयति - സംരക്ഷിക്കുന്നു

क्रियापदानि

अपहरन्ति - अप+हृञ् हरणे पर.लट्.प्र.पु.ब.व.।

निवारयन्ति - नि+वृञ् आवरणे पर.लट्.प्र.पु.ब.व.।

आनयामि - आङ्+ णीञ् प्रापणे पर.लट्.उ.पु.ए.व.।

निवेदयति - नि+विद्लृ आख्याने पर.लट्,प्र.पु.ए.व.।

प्रशंसति - प्र+शंस् स्तुतौ पर.लट्.प्र.पु.ए.व.।

नामपदानि

क्षेमदर्शी - नकारान्तः पु.प्र.ए.व.

प्रच्छन्नवेषम् - अकारान्तः पु.द्वि.ए.व.

राष्ट्ररक्षणकर्मसु - नकारान्तः नपु.स.ब.व.

पर्यायपदानि

राजा - राट्, पार्थिवः, क्ष्माभृत्, नृपः, भूपः, महीक्षित्।

सचिवः - मन्त्री, धीसचिवः, अमात्यः, कर्मसचिवः।

अव्ययलक्षणम्

सदृशं त्रिषु लिङ्गेषु
सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु
यन्नव्येति तदव्ययम्॥

Draft

Draft

# पाठः - ५

# सूक्तिरत्नानि।

| | |
|---|---|
| आशयः | भरणघटनामूल्यानि। |
| उपाशयः | स्वातन्त्र्यम्, समत्वम्। |
| व्यवहाररूपम् | सुभाषितम्। |
| उद्देश्यानि/लक्ष्याणि | भरणघटनामूल्यानि जानन्ति।<br>समाजसेवातत्पराः भवन्ति। |
| मूल्यम् / मनोभावः | धर्मेतरबोधः।<br>सद्गुणार्जनम्।<br>परस्परस्नेहः। |
| पठनलक्ष्याणि | सुभाषितानि आलपति।<br>स्फोरकपत्रं निर्माति।<br>सङ्गणकयन्त्रे टङ्कणं कर्तुं सामर्थ्यं जनयति।<br>सुभाषितसम्पुटं निर्माति।<br>तृतीयाविभक्तिज्ञानं जनयति।<br>विना इत्यव्ययस्य प्रयोगपरिचयः जायते। |
| पठनक्षमता | आलपनसामर्थ्यं वर्धते।<br>टङ्कणसामर्थ्यम् वर्धते।<br>वाक्यरचनाकौशलं वर्धते। |
| कालांशः | १२ |

**पाठस्य आमुखम्।**

मनुष्यत्वस्य विकासाय सुभाषितानि उपकुर्वन्ति। व्यक्तित्वविकसने अपि अस्य स्थानम् अद्वितीयमेव। संस्कृतभाषायामिव इतरभाषासु अपि सुभाषितानि सन्ति। एवं पाठेऽस्मिन् कैरल्यां विद्यमानानि सुभाषितानि संस्कृतेन अनूद्य प्रतिपाद्यन्ते।

**प्रवेशकप्रवर्तनम्।**

कैरल्यां विद्यमानानि स्वातन्त्र्यमहत्त्वसूचकानि पद्यानि ऐ.सि.टि.द्वारा श्रावयति। (സ്നേഹമാണഖിലസാരമൂഴിയിൽ, ബന്ധുരകാഞ്ചന കൂട്ടിലാണെങ്കിലും ബന്ധനം ബന്ധനം തന്നെ പാരിൽ, മനസ്സു നന്നാവട്ടെ മതമേതെങ്കിലുമാകട്ടെ മാനവഹൃത്തിൻ ചില്ലയിലെല്ലാം മാൺപുകൾ വിടരട്ടെ) तान्यधिकृत्य छात्रसंङ्घेषु चर्चां कारयति।

**पाठपग्रथनम्।**

अस्मिन् पाठभागे चत्वारि सुभाषितानि विद्यन्ते। तत्र कैरल्याः अनूदितं सुभाषितद्वयं संस्कृते विद्यमानं सुभाषितद्वयं च वर्तते। तानि तु स्वातन्त्र्यस्य साहोदर्यस्य धर्मबोधस्य क्षमादीनां च प्राधान्यद्योतकानि भवन्ति। कुमारनाशान् महोदयस्य സ്വാതന്ത്ര്യം തന്നെ അമൃതം इत्यादिवचनं संस्कृतेन अनूद्य रचितं भवति प्रथमं सुभाषितम्। पुनः श्रीनारायणगुरुदेवस्य ജാതിഭേദം മതദ്വേഷം ഏതുമില്ലാതെ സർവ്വരും इत्यादिवचनं च सुभाषितत्वेन स्वीकृतम्। तथा सूक्तिमालातः पञ्चतन्त्रात् च स्वीकृते सुभाषिते च भवतः।

**चित्राणां विशदीकरणम्।**

स्वातन्त्र्यस्य महिमानं बोधयत् एकं चित्रं अस्ति। (पुटसंख्या-36) तत्र पञ्जरात् ऊर्ध्वं डयमानः शुकः भवति।

श्रीनारायणगुरुदेवस्य चित्रम् (पुटसंख्या -38)

बुद्धः, महात्मागान्धी, मदर् तेरेसा इत्येतेषां सम्मिश्रचित्रम् (पुटसंख्या -39)

## पठनप्रवर्तनानि।

**प्रवर्तनम् १ - सुभाषितालपनम्।**

पठनलक्ष्यम् -सुभाषितानि आलपति।

सुभाषितानि सङ्घशः व्यक्तिशश्च सतालम् आलपति। सुभाषितानाम् आलपनम् श्रावयति। (ऐ.सि.टि.द्वारा सस्वरालपनं श्रावयितुं शक्यते)

(प्रादेशिकभाषायां विद्यमानानि स्वातन्त्र्यादीनां महत्त्वसूचकानि पद्यानि ऐ.सि.टि.द्वारा श्रावयितुं शक्यते।)

Draft

**मूल्यनिर्णयसूचकानि।**

अक्षरस्फुटता। आलपनशैली। आशयबोधः।

**प्रवर्तनम् २ - स्फोरकपत्ररचनम्।**

पठनलक्ष्यम् -स्फोरकपत्रं निर्माति।

पाठभागस्थानि आप्तवाक्यानि ध्येयवाक्यानि च स्वीकृत्य स्फोरकपत्ररचनायै छात्रान् प्रेरयति। (काश्चन स्फोरकपत्रमातृकाः ऐ.सि.टि.द्वारा प्रदर्शयति।)

आप्तवाक्यानि।

परोपकारः पुण्याय पापाय परपीडनम्।

गतानुगतिको लोकः न लोकः पारमार्थिकः।

चित्ते वाचि क्रियायां च साधूनामेकरूपता।

चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः।

सुपुत्रः कुलदीपकः।

क्षमया किं न सिद्ध्यति।

पुत्रे मित्रवदाचरेत्।

ज्ञानेन मुक्तिर्न तु मुण्डनेन।

वसुधैव कुटुम्बकम्।

विद्वान् सर्वत्र पूज्यते।

ध्येयवाक्यानि।

सत्यमेव जयते - भारतसर्वकारः।

यतो धर्मस्ततो जयः - सर्वोच्चन्यायालयः।

बहुजनहिताय बहुजनसुखाय – आकाशवाणी।

सत्यं शिवं सुन्दरम् - दूरदर्शनम्।

ज्ञानादेव तु कैवल्यम् - श्रीशङ्कराचार्यसंस्कृसर्वकलाशाला।

योगक्षेमं वहाम्यहम् - भारतीय जीवन् बीमा निगम्।

विद्यया अमृतमश्नुते - NCERT/EZHIMALA NAVAL ACADEMY/ महात्मागाँधी

Draft

सर्वकलाशाला/काशी हिन्दू सर्वकलाशाला।

मृदुभावे दृढकृत्ये – केरल-आरक्षकविभागः।

निर्माय कर्मणा श्रीः - कालिकट् सर्वकलाशाला।

गीर्नः श्रेयः - केरल भाषा इन्स्टिट्यूट्।

कर्मणि व्यज्यते प्रज्ञा - केरला सर्वकलाशाला।

(ध्येयवाक्यानाम् आप्तवाक्यानां च सम्पुटनिर्माणम्, महात्मनां सचित्रपुस्तकनिर्माणम् च कर्तुं शक्यते।)

( महद्वचनानि स्फोरकपत्रे लिखित्वा कक्ष्यायां प्रदर्शयितुं शक्यते।)

(अत्र स्वीयमूल्यनिर्णयाय परस्परमूल्यनिर्मयाय च अवसरः वर्तते।)

**मूल्यनिर्णयसूचकानि।**

आकर्षणीयता, लेखनशैली, अक्षरशुद्धिः।

**प्रवर्तनम् ३ - टङ्कणकार्यम्।**

पठनलक्ष्यम् - सङ्कणकयन्त्रे टङ्कणं कर्तुं सामर्थ्यं जनयति।

पूर्वस्मिन् प्रवर्तने दत्तानि वा अन्यानि वा कतिपयानि आप्तवाक्यानि ध्येयवाक्यानि च सङ्कणकयन्त्रे टङ्कणाय छात्रान् निर्दिशति। तस्मात् पूर्वं कुञ्चिकाफलकस्य (KEYBOARD) परिचायनमपि करणीयं भवति। टङ्कणानन्तरं परिरक्षणाय (Save) निर्दिशति।




(डिजिट्टल् पोस्टर् रचनायां तात्पर्यं जनयितुं शक्यते।)



Draft

**मूल्यनिर्णयसूचकानि।**

Liber office writer इत्यस्य उपयोगः। कुञ्चिकापरिज्ञानम्। टङ्कणवेगता।

**प्रवर्तनम् ४ - सुभाषितसम्पुटनिर्माणम्।**

पठनलक्ष्यम् - सुभाषितसम्पुटं निर्माति।

मानिवकगुणप्रतिपादकानि सुभाषितानि सञ्चित्य सम्पुटनिर्माणाय निर्दिशति। चयनाय सहायकान् ग्रन्थान् च ददाति।

ग्रन्थसूचनाः - सुभाषितावलिः, सुभाषितसङ्ग्रहः, अमृतवाणी (संस्कृतमाधुरी)

सुभाषितानि।

शोकारातिभयत्राणं
प्रीतिविश्रम्भभाजनम्।
केन रत्नमिदं स्पृष्टं
मित्रमित्यक्षरद्वयम्॥

मनस्यन्यद्वचस्यन्य-
त्कर्मण्यन्यद्दुरात्मनाम्।
मनस्येकं वचस्येकं
कर्मण्येकं महात्मनाम्॥

दशकूपसमा वापी
दशवापीसमो ह्रदः।
दशह्रदसमः पुत्रः
दशपुत्रसमो द्रुमः॥

क्षमाशस्त्रं करे यस्य
दुर्जनः किं करिष्यति।
अतृणे पतितो वह्निः
स्वयमेवोपशाम्यति॥

दानं भोगो नाशस्तिस्रो
गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते
तस्य तृतीया गतिर्भवति।

षड्गुणाः पुरुषेणेह
त्यक्तव्या न कदाचन।
सत्यं दानमनालस्यम्
अनसूया क्षमा धृतिः॥

यथा चित्तं तथा वाचो
यथा वाचस्तथा क्रियाः।
चित्ते वाचि क्रियायां च
साधूनामेकरूपता॥

(प्रादेशिकभाषया विवर्तितानि सुभाषितानि सञ्चित्य सम्पुटनिर्माणं कर्तुं शक्यते।)

Draft

## मूल्यनिर्णयसूचकानि।

उचितानि सुभाषितानि, सम्पुटघटना, आकर्षणीयता।

## प्रवर्तनम् ५ - प्रश्नानामुत्तरलेखनम्।

पठनलक्ष्यम् - तृतीयाविभक्तिज्ञानं जनयति।

सूचनानुसारं प्रश्नानाम् उत्तरलेखनाय छात्रान् निर्दिशति। उत्तरस्य चित्रमपि प्रश्नेन साकं दत्तमस्ति। उत्तराणि तृतीयाविभक्तावेव भवितव्यानि।

१. कर्षकः केन हलति? कर्षकः हलेन हलति।

२. छात्राः कया लिखन्ति? छात्राः तूलिकया लिखन्ति।

३. रमेशः कया गच्छति? रमेशः द्विचक्रिकया गच्छति।

तृतीयाविभक्तिपट्टिका

| प्रथमा | तृतीया |
|---|---|
| बालकः | बालकेन |
| विश्वपाः | विश्वपा |
| कविः | कविना |
| गुरुः | गुरुणा |
| पिता | पित्रा |
| रैः | राया |
| गौः | गवा |
| कन्या | कन्यया |

| | |
|---|---|
| मतिः | मत्या |
| नदी | नद्या |
| धेनुः | धेन्वा |
| स्वसा | स्वस्रा |
| माता | मात्रा |
| वनं | वनेन |
| वारि | वारिणा |
| मधु | मधुना |
| दाता | दात्रा |

सहायकग्रन्थः - सिद्धरूपचन्द्रिका (संस्कृतमाधुरी, SCERT, KERALA)

## मूल्यनिर्णयसूचकानि।

पदावबोधः, विभक्त्यवबोधः, आशयावबोधः।

Draft

**प्रवर्तनम् ६ - 'विना' इत्यव्ययमुपयुज्य वाक्यरचना।**

पठनलक्ष्यम् - विना इत्यव्ययस्य प्रयोगपरिचयः जायते।

विना इत्यव्ययस्य योगे द्वितीया, तृतीया, पञ्चमी वा विभक्तिः प्रयोक्तव्या। पठनप्रवर्तनेनानेन द्वितीयायाः प्रयोगपरिचयः करणीयः। सूचनानुसारं लेखनाय छात्रान् निर्दिशति।

मानवः भोजनं विना न जीवति।

मानवः वायुं विना न जीवति।

बालकः लेखनीं विना न लिखति।

वर्षाकाले छत्रं विना न गच्छति।

बालकः क्रीडां विना न तुष्यति।

माधवः तर्कं विना न तुष्यति।

**मूल्यनिर्णयसूचकानि।**

विभक्त्यवबोधः, आशयः, वाक्यघटना।

**अग्रिमपाठसम्बद्धं प्रवर्तनम्।**

ज्ञानात् नव्यायते कर्म।

ज्ञानार्जनेनैव कर्मनवीकरणं सम्भवतीत्याशयः। अर्थात् विद्या एव परं धनम्, तया कर्मकुशलो भूत्वा समाजहिताय योग्यानि कार्याणि करणीयानि इति अथवा विद्याविहीनः पशुः इत्यतः सर्वे विद्यायुक्ताः भवन्तु इत्याशयः।

**अनुबन्धः।**

स्वतन्त्र्यम्, समत्वम्, धर्मेतरत्वम्, दया इत्यादयः अनेन पाठेन व्यवह्रियन्ते। छात्रान् समाजसेवातत्परान् कर्तुं पाठोऽयं शक्तः। समाजसेवातत्पराः जना एव राष्ट्रपुरोगत्यर्थं आवश्यकाः। राष्ट्रहिताय सन्नद्धाः जनाः वर्धमानाः भवन्ति।

सर्वे स्वतन्त्राः, समभावनया द्रष्टव्याः, धर्मेतरस्वभावः आवश्यकः इत्यादि मनोभावाः, दयादयः गुणाः च मानवहृदयेषु समावेशनीयाः भवन्ति। तदर्थं बालकानां मनस्सु पूर्वोक्तानां समावेशनाय एव पाठोऽयं सङ्कलितः तथा पर्याप्तः च।

पदार्थाः -

| | | |
|---|---|---|
| श्रावयित्वा | - | കേൾപ്പിച്ചിട്ട് |

Draft

| | | |
|---|---|---|
| अमूल्यम् | - | വിലപ്പെട്ടത് |
| नैके | - | അനേകം |
| परामृष्टवन्तः | - | പരാമർശിച്ചിട്ടുള്ളവർ |
| विवेकगुलिका | - | തിരിച്ചറിവാകുന്ന ഗുളിക |
| अनूद्यते | - | പരിഭാഷപ്പെടുത്തുന്നു |
| आचरणीयः | - | ആചരിക്കേണ്ടത് |
| अवगच्छतु | - | മനസ്സിലാക്കൂ |
| नव्यायते | - | നവീകരിക്കപ്പെടുന്നു |
| बहुधा | - | പല പ്രകാരത്തിൽ |
| वशीकुर्यात् | - | വശത്താക്കണം |

क्रियापदानि।

वर्तन्ते - वृतु वर्तने, आत्म.लट्.प्र.पु.ब.व.।

वशीकुर्यात् - वशीपूर्व डुकृञ् करणे, पर.विधिलिङ्.प्र.पु.ए.व.।

श्रूयताम् - श्रु श्रवणे, आत्म.लोट्.प्र.पु.ए.व.।

नामपदानि

मरणात् - अकारान्तः नपुँ.प.ए.व.।

अदः - सकारान्तः पुँ.प्र.ए.व.।

प्रेम्णा - नकारान्तः नपुँ.तृ.ए.व.।

आत्मनः - नकारान्तः पुँ.ष.ए.व.।

पर्यायपदानि

दया - कृपा, दया, अनुकम्पा, अनुक्रोशः, हसः।

അവനവനാത്മസുഖത്തിനായാചരിക്കുന്നവ
അപരന്നുസുഖത്തിനായ് വരേണം

(ആത്മോപദേശശതകം - ശ്രീനാരായണഗുരു)

ബന്ധുരകാഞ്ചനകൂട്ടിലാണെങ്കിലും
ബന്ധനം ബന്ധനം തന്നെ പാരിൽ

(ബന്ധനം - വള്ളത്തോൾ)

Draft

# पाठः - ६

# सः स्वप्नोऽपि पुष्पितः ।

| | |
|---|---|
| आशयः | भरणघटनामूल्यानि। |
| उपाशयः | मौलिकावकाशाः । |
| व्यवहाररूपम् | नाटकम्। |
| उद्देश्यानि/लक्ष्याणि | विद्यार्जनाय सर्वेषामधिकारः वर्तते इति बोधो जनयति।<br>नवोत्थाननायकान् परिचाययति। |
| मूल्यम् / मनोभावः | धर्मेतरत्त्वम् ।<br>विद्याभ्यासः।<br>मौलिकावकाशः। |
| पठनलक्ष्याणि | टिप्पणिं लिखति।<br>नाटकस्य रङ्गाविष्कारं करोति।<br>इष्टकथापात्राणां वैशिष्ट्यं लिखति।<br>अय्यङ्कालिमहाशयस्य जीवनचरितं रचयति।<br>नाटकानि तत्कर्तृन् चाधिकृत्य लिखति। |
| पठनक्षमता | साभिनयावतरणपटुत्वं वर्धते।<br>सम्भाषणचातुर्यं वर्धते।<br>लेखनसामर्थ्यं वर्धते। |
| कालांशः | १६ |

Draft

**पाठस्य आमुखम्।**

पुरा केरलेषु संजातस्य जातिविवेचनस्य तज्जन्यप्रतिषेधानां च अनुस्यूतफलं भवति एकोनविंशतितमे शताब्दे समारब्धानि सामूहिकपरिष्करणप्रस्थानानि। एकोनविंशतितमस्य शताब्दस्य पूर्वार्धे समारब्धानि इमानि प्रतिषेधानि विंशतितमस्य शताब्दस्य पूर्वार्धे समापितं च। धर्मपराणां जातीयपराणां च अनाचारान्धविश्वासानां दुर्गन्धेन प्रपूरिता सामाजिकदुःस्थितिरेव तदानीन्तनकाले केरलेषु अवर्तत। एवं विद्याभ्यास-सञ्चार-

वस्त्रधारण- विग्रहाराधनेत्यादिभ्यः निषिद्धानां तिरस्कृतानां प्रगत्यर्थम् अनेके महात्मानः कृतप्रयत्नाः आसन्। तेषु प्रथमगणनीयः भवति अय्यङ्काली। तं महात्मानम् अधिकृत्यैव पाठोऽयं समाकलितः।

**प्रवेशकप्रवर्तनम्।**

नाटकमिति साहित्यरूपमधिकृत्य चर्चां कृत्वा आस्वादकहृदयेषु आशयसमावेशनाय योग्यं कलारूपं भवति नाटकम् इति उपसंहरति। संस्कृतसाहित्ये विरचितानि अनेकानि नाटकानि सन्ति इति छात्रान् उद्बुध्य भास-कालिदासादीनां महाकवीनां केषाञ्चन नाटकानां परिचायनमपि करोति।

भासस्य नाटकानि ( भासनाटकचक्रम्)।

१. स्वप्नवासवदत्तम्
२. प्रतिज्ञायौगन्धरायणम्
३. ऊरुभङ्गम्
४. दूतवाक्यम्
५. पञ्चरात्रम्
६. दूतघटोत्कचम्
७. कर्णभारम्
८. मध्यमव्यायोगः
९. प्रतिमानाटकम्
१०. अभिषेकनाटकम्
११. अविमारकम्
१२. चारुदत्तम्
१३. बालचरितम्

कालिदासस्य नाटकानि।

१. अभिज्ञानशाकुन्तलम्।
२. विक्रमोर्वशीयम्।
३.मालविकाग्निमित्रम्।

भवभूतेः नाटकानि।

१. मालतीमाधवम्
२.उत्तररामचरितम्
३.महावीरचरितम्

Draft

इतरनाटकानि तेषां कर्तारः च।

| | | |
|---|---|---|
| नागानन्दम् | – | श्रीहर्षः |
| आश्चर्यचूडामणिः | – | शक्तिभद्रः |
| मुद्राराक्षसम् | – | विशाखदत्तः |
| मृच्छकटिकम् | – | शूद्रकः |
| किरातार्जुनीयव्यायोगः | – | कोटुङ्ङल्लूर् कुञ्ञिक्कुट्टन् तम्पुरान् |
| वेणीसंहारम् | – | भट्टनारायणः |

**पाठापग्रथनम्।**

पुरा केरलेषु विद्याभ्यासाय सर्वेषां अधिकारः नासीत्। तादृशे सामाजिकस्थितिविशेषे अय्यङ्कालिमहाशयेन कृतः प्रयत्नः एव नाटकेऽस्मिन् प्रतिपाद्यविषयः। तदानीन्तनकाले सर्वकाराणाम् आदेशे सत्यपि तिरस्कृताः जनाः अध्ययनात् निषिद्धाः आसन्। तेषां विद्याभ्यासाय अय्यङ्काली बहुधा यतितवान्। तत्र पञ्चमी नामिकां बालिकां नीत्वा ऊरूट्टम्पलं विद्यालयं गच्छति। तदा भूप्रभोः अनुयायिनः तान् निष्कासयन्ति। तिरस्कृतायाः पञ्चम्याः स्पर्शनेन विद्यालयः अशुद्धो जात इति धिया भूप्रभुः विद्यालयं ज्वालयामास। एतादृश्याः दुरवस्थायाः स्मरणार्थं तत्र इदानीमपि सः विद्यालयः तिष्ठति । तत्र भूप्रभुणा ज्वालिता अर्धदग्धा काचन दीर्घपीठिका अपि चरित्रस्मारकत्वेन संरक्षिता भवति। तद्दृष्ट्वा समकालिकाः, इदानीं तस्मिन् विद्यालये पठन्तः छात्राः अध्यापकं प्रति ससंशयं तत् किमिति पृच्छन्ति । सः सन्दर्भः अत्र नाटकत्वेन परामृश्यते। पूर्वोक्ता चरित्रवस्तुतापि नाटके प्रतिपाद्यविषयत्वेन स्वीकृता।

**चित्राणां विशदीकरणम्।**

ऊरूट्टम्बलं विद्यालयस्य पुरतः अध्यापकेन सह छात्राः तत्रस्थां अर्धदग्धां दीर्घपीठिकां दृष्ट्वा तामधिकृत्य अध्यापकं सन्देहं पृच्छन्ति। (पुटसंख्या 45)

अय्यङ्कालिः भूप्रभुःच विद्यार्जनविषये संवादं कुरुतः। पश्चात्तले कृषिभूमौ कर्म कुर्वन्तः जनाः च सन्ति। (पुटसंख्या-46)

पञ्चमी नामिकां बालां विद्यालये पाठयितुं आनयन् अय्यङ्कालिः, तथा च तं निवारयन्तः भूप्रभुः अनुचराश्च। (पुटसंख्या - 47)

ऊरूट्टम्बलं विद्यालयस्य पुरतः स्थित्वा अध्यापकः छात्रान् अभिभाषते। (पुटसंख्या-48)

Draft

## पठनप्रवर्तनानि।

### प्रवर्तनम् १ - टिप्पणीलेखनम् ।

पठनलक्ष्यम् - टिप्पणिं लिखति।

विद्याभ्यासः अस्माकं परमाधिकारः इति विषये टिप्पणीलेखनाय ICT द्वारा अस्माकं राज्याङ्गे अस्मिन् विषये प्रकल्पितानि अनुशासनानि प्रदर्शयति। चर्चां कारयति। अन्ते टिप्पणीलेखनाय छात्रसङ्घान् निर्दिशति।

(व्यक्तित्वविकासाय जीवनविजयाय राष्ट्रहिताय च विद्याभ्यासः अनिवार्यः एव। अस्माकं राज्याङ्गानुसारं सर्वेषां विद्याभ्यासाय अधिकारः दृश्यते। विद्याभ्यासाय राज्याङ्गे काश्चन व्यव्यस्थाः परिकल्पिताः। निश्शुल्कः निर्बन्धितः च प्राथमिकविद्याभ्यासः, न्यूनपक्षाणां प्रत्येकविद्याभ्यासाधिकाराः, धर्मपरविद्याभ्यासः, दुर्बलविभागीयानां विद्याभ्यासः, विद्याभ्यासकार्येषु राष्ट्र-राज्यसर्वकाराणां योगदानम् इत्याद्यः भवन्ति ताः व्यवस्थाः ।राज्याङ्गस्य पञ्चचत्वारिंशत्तमेन अनुच्छेदेन (വകുപ്പ്) एव निश्शुल्कस्य निर्बन्धितस्य सार्वत्रिकस्य च विद्याभ्यासस्य अधिकारः परिकल्प्यते। धर्मपरस्य विद्याभ्यासस्य अधिकारः राज्याङ्गस्य अष्टविंशतितमानुच्छेदेन दत्तमस्ति। तथापि सार्वकारिकविद्यालयेषु धर्मबोधनं न करणीयमित्यपि अनेन व्यवस्थापितं दृश्यते। २९(१), २९ (२), २९(३), ३० इत्यादिभिः अनुच्छेदद्वारा न्यूनपक्षविभागीयानां विद्याभ्यासाधिकारः अनुशास्यते। ४६ इति अनुच्छेदेन दुर्बलविभागानां अधिकारोऽपि प्रशास्यते। विद्याभ्यासविषये राष्ट्र-राज्यसर्वकाराणां सम्मिलितयोगदानं आवश्यकमित्यपि अस्माकं राज्याङ्गे प्रकल्पितं दृश्यते।)

### मूल्यनिर्णयसूचकानि।

उचिता भाषा । उचितः आशयः। घटना।

### प्रवर्तनम् - २ - नाटकस्य रङ्गाविष्कारः।

पठनलक्ष्यम् - नाटकस्य रङ्गाविष्कारं करोति।

अस्मिन् नाटके विनुः, नन्दा, अध्यापकः, अय्यङ्काली, भूप्रभुः, कृषीवलाः, पञ्चमी, रिया, तन्मया, षाजिः इत्यादीनि दशाधिकानि कथापात्राणि सन्ति । तेषां कथापात्राणां वेषभूषादिकं कथं भवितव्यं इति प्रथमतया छात्रान् बोधयति। तदनु छात्रान् सङ्घीकृत्य चर्चां कृत्वा कथापात्रस्वीकाराय तान् निर्दिशति। रङ्गाविष्कारसमये सङ्गीतस्य शब्दसंयोजनस्य रङ्गसज्जीकरणस्य च साध्यताः छात्रान् बोधयित्वा रङ्गाविष्काराय निर्दिशति ।

Draft

(नाटकस्य राङ्गाविष्कारावसरे अभिनये निपुणान् छात्रान् द्रष्टुं शक्यते। तान् अभिनयाध्यायनाय नीत्वा तस्मिन् मण्डले अतिनिपुणान् कर्तुं शक्यते। एवं चलनचित्रादिषु अभिनयस्य अवसरः लभ्यते।) (संस्कृतनाटकानां वीडियो प्रदर्शनं कर्तुं शक्यते।)

(अभिनयमधिकृत्य शिल्पशालामयोजयितुं शक्यते।)(कक्षायां अय्यङ्कालिमहोदयस्य वेषं धृत्वा (प्रच्छन्नवेषेण) असमत्वस्य निवारणार्थं तेन कृतान् प्रयत्नान् प्रभाषणरूपेण अवतारयितुं शक्यते।)

**मूल्यनिर्णयसूचकानि।**

अभिनयः। रङ्गसज्जीकरणम्। उच्चारणशुद्धिः। उच्चारणशैली।

**प्रवर्तनम् ३ - इष्टकथापात्रणां वैशिष्ट्यलेखनम्।**

पठनलक्ष्यम् -इष्टकथापात्राणां वैशिष्ट्यं लिखति।

छात्रान् चतुस्सङ्घान् कृत्वा नाटके विद्यमानेषु कथापात्रेषु इष्टकथापात्रम् अधिकृत्य लेखनाय निर्दिशति।

मातृका -

सः स्वप्नोऽपि पुष्पितः इति नाटकं मया पठितम्। तिरस्कृतानां जनानां विद्याभ्यासाय पूर्वस्मिन् काले बहवः महात्मानः कृतप्रयत्नाः इति नाटकेनानेन ज्ञातम्।चरित्रपरमिदं नाटकं अतीव हृद्यं भवति।

अस्मिन् नाटके दशाधिकानि कथापात्राणि सन्ति। तत्र महात्मा अय्यङ्कालिः एव मम इष्टकथापात्रम्। धर्मपराणि जातीयानि च उच्चनीचत्वानि आसन्। तस्मिन् काले साधुजनहिताय उद्युक्तस्य अय्यङ्कालि महाशयस्य मनोभावं धैर्यं च मम इष्टाय प्रधानं कारणं अभवत्। तस्य महाशयस्य वस्त्रधारणं भाषणशैली च कारणत्वेन विलसति।

**मूल्यनिर्णयसूचकानि।**

उचिता भाषा। वाक्यघटना। उचितः आशयः ।

**प्रवर्तनम् ४ - जीवनचरितलेखनम्**

पठनलक्ष्यम् - अय्यङ्कालिमहाशयस्य जीवनचरितं रचयति।

जीवनचरितलेखनाय पाठभागे सूचनाः प्रदत्ताः । ताः सूचनाः अधिकृत्य चर्चित्वा कथं अय्यङ्कालिमहाशयस्य जीवनचरितं लेखनीयमिति छात्रान् ज्ञापयति।

Draft

मातृका -

**महात्मा अय्यङ्कालिः।**

साधुजनपरिपालने बद्धश्रद्धः आसीत् अय्यङ्कालिमहाशयः। साधुजनानां विद्याभ्यासादिषु विद्यमानस्य अधिकाराणां प्राप्त्यर्थमेव सोऽयं श्रेष्ठः कृतप्रयत्नः इति सर्वे जानन्ति।एवं तिरस्कृतानां उन्नत्यर्थं कृतप्रयत्नः अय्यङ्कालिमहाशयः १८६३ आगस्त् २८ तमे दिनाङ्के तिरुवनन्तपुरस्थे वेङ्ङानूर् देशे जनिमलभत। अस्य पिता अय्यः माता माला च। चात्तः,गोपालः, वेलायुधः, वेलुक्कुट्टी इति चत्वारः सोदराः कण्णा, चिन्ना, कुञ्ञी इति तिस्रः भगिन्यः च आसन् । तिरस्कृतानां समुद्धारणार्थं अय्यङ्कालिमहोदयेन १९०७ तमे वर्षे साधुजनपरिपालनसङ्घम् स्थापितम् । १९४१ जूण् १८ तमे दिनाङ्के अय्यङ्कालिः दिवङ्गतोऽभवत् ।

(इतरान् समाजपरिष्कर्तॄन् अधिकृत्य सम्पुटनिर्माणम्।) (अय्यङ्कालिमहाशयम् अधिकृत्य कैरल्यां लघुप्रबन्धं रचयितुं शक्यते।)

**मूल्यनिर्णयसूचकानि।**

उचिता भाषा। वाक्यघटना। आशयः। उचितं शीर्षकम् ।

**प्रवर्तनम् - ५ - संस्कृतकवीनां तेषां नाटकानां च नामानि योजयतु ।**

पठनलक्ष्यम् - नाटकानि तत्कर्तॄन् चाधिकृत्य लिखति।

संस्कृतसाहित्ये विद्यमानानां नाटकानां तेषां कर्तॄणां च नामानि सङ्गणकयन्त्रे सज्जीकृत्य ICT द्वारा प्रदर्शयति । एतेषु केषाञ्चन आचार्याणां तेषां नाटकानां च नामानि एव पाठपुस्तके दत्तमिति उक्त्वा रेखया योजनाय निर्दिशति।

मातृका -

| | | |
|---|---|---|
| कालिदासः | - | अभिज्ञानशाकुन्तलम् । |
| भवभूतिः | - | उत्तररामचरितम् । |
| भासः | - | कर्णभारम् । |
| शूद्रकः | - | मृच्छकटिकम् । |
| शक्तिभद्रः | - | आश्चर्यचूडामणिः। |

(संस्कृतनाटकानि अधिकृत्य लघुप्रभाषणं कर्तुं शक्यते।)

Draft

(पाठानुभवविपुलीकरणाय संस्कृतमाधुरीपुस्तकानां वाचनाय निर्दिशतु।)

**मूल्यनिर्णयसूचकानि।**

उचितं योजनम्। नाटकानां सामान्यज्ञानम्। धारणा।

**अग्रिमपाठसंयोजकं प्रवर्तनम्।**

चित्रं निरीक्ष्य चर्चां कृत्वा आशयकथनम् - यथा - शास्त्र-साङ्केतिक-विज्ञानादिषु मण्डलेषु केरलस्य विकासः अद्भुतावहः एव। केरलस्य समग्रपुरोगतिः अनेन चित्रेण सूच्यते। बहिराकाशमण्डले वैज्ञानिकमण्डले च केरलीयैः आर्जितायाः प्रगतेः सूचना अपि अत्र दृश्यते।

**अनुबन्धः।**

विद्यासम्बन्धीनि सुभाषितानि

१) विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय ।
खलस्य साधोर्विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय ॥

२) न चोरहार्यं न च राजहार्यं
न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनात् प्रधानम् ॥

३) क्षणशः कणशश्चैव
विद्यामर्थं च साधयेत् ।
क्षणे नष्टे कुतो विद्या
कणे नष्टे कुतो धनम् ।।

Draft

पदार्थाः -

| | | |
|---|---|---|
| अङ्गणम् | - | മുറ്റം |
| अत्रत्यः | - | ഇവിടെയുള്ള |
| अनन्यदृश्याः | - | **മറ്റെങ്ങും കാണാത്തത്** |
| असंभव्यम् | - | സംഭവിക്കാൻ പാടില്ലാത്തത് |
| अस्मदादीनाम् | - | ഞങ്ങളെ പോലുള്ളവർക്ക് |
| आदेशः | - | ഉത്തരവ് |
| ऋषभशकटम् | - | കാളവണ്ടി |
| एतावता | - | ഇതു വരെ |
| कल्पनीयः | - | അനുവദിക്കേണ്ടതാണ് |
| कालातीतः | - | കാലത്തിന് അതീതമായത് |
| कियत्कालतः | - | എത്രകാലമായി |
| कैरली | - | **കേരളത്തെ സംബന്ധിച്ചത് (പുരോഗതി)** |
| ज्वालयामास | - | കത്തിച്ചു |
| तत्प्राप्तिपर्यन्तम् | - | അത് നേടുന്നതു വരെ |
| तावता | - | അതു വരെ |
| तिरस्कृतानाम् | - | അവഗണിക്കപ്പെട്ടവരുടെ |
| निरुद्धाः | - | തടയപ്പെട്ടവർ |
| निर्मूलनाय | - | ഉന്മൂലനം ചെയ്യുന്നതിന് |
| निष्कासयन्ति | - | പുറം തള്ളുന്നു |
| भवादृशानाम् | - | നിങ്ങളെ പോലുള്ളവർക്ക് |
| मयूखः | - | കിരണം |
| यतिष्यामहे | - | ഞങ്ങൾ പ്രയത്നിക്കും |
| लवनगीतम् | - | കൊയ്ത്ത് പാട്ട് |
| सामाजिकस्थितिः | - | സാമൂഹികസ്ഥിതി |
| हठात् | - | ബലമായി |

Draft

क्रियापदानि

आरभामहे - आङ् रभ्-आत्म.लट्.उ.पु.ब.व.।

पश्य – दृशिर् प्रेक्षणे- पर.लोट्.म.पु.ए.व.।

बोधयामि - बुध् अवगमने-णिचि.पर.लट्.उ.पु.ए.व.।

नेष्यामि - णीञ् प्रापणे- पर.लृट्.उ.पु.ए.व.।

ज्वालयामास- ज्वल् दीप्तौ - णिचि.पर.लिट्.प्र.पु.ए.व.।

नामपदानि

अर्धदग्धा - आकारान्तः.स्त्री.प्र.ए.व.।

भूप्रभोः - उकारान्तः.पुँ.ष.ए.व.।

अनुयायिनः - नकारान्तः.पुँ.प्र.ब.व.।

रात्रौ - इकारान्तः.स्त्री.स.ए.व.।

धिया - ईकारान्तः.स्त्री.तृ.ए.व.।

समरपद्धतीः - इकारान्तः.स्त्री.द्वि.ब.व.।

एतेषाम् - दकारान्तः.पुँ.ष.ब.व.।

बिरुदधारिणाम् - न.पुँ.ष.ब.व.।

पर्यायपदानि

कर्षक- क्षेत्रजीवः, कर्षकः, कृषिकः, कृषीवलः।

अन्धकारः - अन्धकारः, ध्वान्तम्, तमिश्रम्, तिमिरम्, तमः।

Draft